प्रथमोऽध्यायः

नमः सरस्वत्यै ।
सश्रीकं प्रभया युतं रुचिरया प्रोद्भासितं गङ्गया
नानावक्त्रविराजितं शशिकलापीडोच्छ्रयाऽलङ्कृतम् ।
आर्योपेतमुपस्थिताखिलगणस्रक्पूजितं सर्वदा
छंदःशास्त्रमिवेश्वरस्य जयति त्रैलोक्यवंद्यं वपुः ॥ १
कृष्णात्रेयस्य गोत्रे समजनि पुरा[1] दाक्षिणात्याग्रणीर्यो
वेलादित्याभिधानः सुकविरभवद्भास्वरस्तस्य सूनुः ।
तत्पुत्रः सुल्हणाख्यः सुललितपदां वृत्तरत्नाकराख्य-
छंदोवृत्तिं स चक्रे सुकविहृदयानंदनीनामधेयाम् ॥ २

शास्त्रारंभे शास्त्रकार इष्टाधिकृतदेवतानमस्कारपूर्वकशास्त्रसंबंधप्रयोजनं श्लोकत्रयेणाह ।

सुखसंतानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं शंकरं लोकशंकरम् ॥ १
वेदार्थशैवशास्त्रज्ञः पव्येकोऽभूद्द्विजोत्तमः ।
तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः ॥ २
तेनेदं क्रियते[2] छन्दो लक्षलक्षणसंयुतम् ।
वृत्तरत्नाकरं नाम बालानां सुखबुद्धये ॥ ३

वेदानामर्था वेदार्थाः । शिवो देवता येषां तानि शैवानि शास्त्राणि । वेदार्थाश्च शैवशास्त्राणि च तानि जानातीति स तथोक्तः य **पव्येको** नाम **द्विजोत्तमोऽभूत्तस्य** पव्येकस्य **केदार**नामा शिवचरणाराधनपरः पुत्रोऽस्ति । **तेन** केदारेणेदं वक्ष्यमाणलक्षणं **छन्दः क्रियते** । **लक्ष्य**मुदाहरणं **लक्षणं** नियताक्षरमात्रागणरचना ताभ्यां **संयुतं लक्षलक्षणसंयुतम्** । किं नाम । **वृत्तरत्नाकरं नाम** । वृत्तानि श्रीप्रभृतीनि तान्येव रत्नानि तेषामाकर[3] उत्पत्तिस्थानम् । किमर्थं । **सुखसिद्धये** । सुखेन सिद्धिः सुखसिद्धिस्तस्यै सुखसिद्धये । केषाम् । **बालानां** मन्दबुद्धीनाम् । किंकृत्वा । **नत्वा** । कम् । **शंकरं** महादेवम् । कथंभूतम् । **लोकशंकरं** लोकानां शं सुखं करोतीति लोकशंकरस्तम् । पुनः कथंभूतम् । **ब्रह्माच्युतार्चितं** विरंचिनारायणपूजितम् । पुनः कथंभूतं । **गौरीविनायकोपेतं** गौरी च विनायकश्च

---

[1] पाठे समजनि वपुरादाक्षिणात्याग्रणीर्यो ।

[2] पाठे कृयते ।

[3] पाठे तेषामाकार ।

गौरीविनायकौ ताभ्यां उपेतं संयुतम् । किमर्थम् । **सुखसंतानसिद्ध्यर्थम्** । सुखं परं ब्रह्मानन्दात्मकं संतानः पुत्रपौत्रादि तयोः सिद्धिः प्राप्तिस्तदर्थं सुखसंतानसिद्ध्यर्थम् । **नत्वा** प्रणम्येति संबंधः । त्रिभिर्विशेषकम् ॥ १-३

छन्दःशब्देन किमुच्यते[4] इत्याह ।

पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ।
मात्रावर्णविभेदेन[5] छन्दस्तदिह कथ्यते ॥ ४

तदिदं शास्त्रे **छन्दः कथ्यते** । **यत्पिंगलादिभिराचार्यैः** छन्दःशास्त्रप्रयोक्तृभि**रुक्त**मभिहितम्[6] । **लौकिकं** लोके भवं न वैदिकं । काव्यादिषु तस्यानुपयोगात् । **द्विधा** द्विप्रकारम् । कथमित्याशंकायां **मात्रावर्णविभेदेने**त्याह । मात्राभेदेन आर्यादि वर्णभेदेन श्रीप्रभृति वृत्तभेदेनेति ॥ ४

अथ ग्रन्थसंख्यामाह ।

षडध्यायनिबद्धस्य छन्दसोऽस्य परिस्फुटम् ।
प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतम् ॥ ५

अधीयन्त इ**त्यध्याया**स्ते च वक्ष्यमाणलक्षणाः संज्ञाभिधानमात्रावृत्तसमवृत्तार्धसमवृत्तविषमवृत्तषट्प्रत्ययलक्षणाः **षडे**व षड्भि**र्निबद्धस्य** छन्दःशास्त्रस्य **प्रमाणं** संख्या **षट्त्रिंशदधिकं शतं विज्ञेयम्** ॥ ५

अथ गणनामाह ।

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ ६

‘‘**गल’ इति प्रथमाक्षरग्रहणमात्रेण गुरुलघुशब्दयोर्ग्रहणमि**’त्याम्नायः । **एभि**र्मयरसतजभनलगै**र्दशभिरक्षरैः** । **समस्त**मपि शब्दब्रह्म **व्याप्तम्** । किमिव । **त्रैलोक्यमिव** । केन । भवगता[7] नारायणेन । ६

एतेषां[8] प्रत्येकं लक्षणमाह ।

---

[4] पाठे किंमुच्यते ।

[5] पाठे मात्राववर्णविभेदेन ।

[6] पाठे प्रयोक्तिरुक्तमभिहितम् ।

[7] पाठे भागवता ।

सर्वगुर्मो मुखान्तर्लौ यरावंतगलौ सतौ ।
ग्मध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवन्त्यत्र गणास्त्रिकाः ॥ ७

अस्मिन् छन्दःशास्त्रे सर्वे गुरवो यस्यासौ **सर्वगुर्मो** मगणो यथा (ऽऽऽ) । **मुखान्तर्लौ यरौ** मुखमादि अंतर्मध्यं आदौ मध्ये लघू ययोस्तौ मुखान्तर्लौ यगणरगणौ (।ऽऽ, ऽ।ऽ) । **अंतगलौ सतौ** । अंते अवसाने गुरुलघू ययोस्तौ सगणतगणौ यथा (।।ऽ, ऽऽ।) । **ग्मध्याद्यौ ज्भौ** । गुरु मध्ये आदौ ययोस्तौ जगणभगणौ यथा (।ऽ।, ऽ।।) । **त्रिलो नः** । त्रिलघुर्नगणो यथा (।।।) । एते मयरसतजभनाऽ**ष्टौ गणा भवन्ति** वर्णवृत्तगणा भवन्तीत्यर्थः । मात्रागणानां वक्ष्यमाणसूत्रे विधानात् । चतुर्गुर्वादीनामपि गणादिसंज्ञा मा भूदित्याशंक्य नियमन्नाह । **त्रिका** इति त्रयः परिमाणं येषां ते त्रिका इति । ७

अथ मात्रागणानाह ।

ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुःकलाः ।
गणाश्चतुर्लघूपेताः पंचार्यादिषु संस्थिताः ॥ ८

आर्याप्रभृतिषु मात्रावृत्तेषु **चतुःकला पञ्च गणा** ज्ञातव्याः । कथम् । **सर्वादिमध्यांतगुरवः** सर्वे[9] च ते आदिश्च मध्यं च अन्तश्च सर्वादिमध्यांतास्तेषु गुरवो येषां ते सर्वादिमध्यान्तगुरवः । **चतुर्भिर्लघुभिरुपेताः** सहिता वेदितव्याः । ८

गुरुलघुपरिज्ञानार्थमाह ।

सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ।
वा पादान्तस्त्वसौ ग्वक्रो ज्ञेयोऽन्यो मातृको लृजुः ॥ ९ इति ।

सहानुस्वारेण वर्तत इति **सानुस्वारः** । **विसर्गान्तः** सविसर्गः । **दीर्घो** द्विमात्रः । **युक्तपरः** संयोगपरो **यो** भवति । **चकाराद्व्यंजनांतोऽपि गृह्यते** । परिमिताक्षरमात्रो गणारचितो वक्ष्यमाणलक्षणो वृत्तस्य चतुर्थांशः **पादस्तस्यान्ते** वर्तमानो लघुरपि विभाषया गुरुः स्यात् । स च कविसमयव्यवहारात् द्वितीयचतुर्थयोरेव पादयोरन्ते वेदितव्यः । यथा ।
प्रायः समासन्नपराभवानां धियो विपर्यस्ततमा भवन्ति ।
असंभवे हेममयस्य जन्तोस्तथाऽपि रामो लुलुभे मृगाय ॥ इति ।
तथा च ।
'श्रियः पतिः[10] श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि'[11] इत्यादि दृष्टव्यम् ।

---

[8] पाठे अमीषं ।

[9] पाठे शर्वे ।

[10] पाठे श्रियपतिः ।

स च प्रस्तारे **वक्रः** स्थाप्य लघुलक्षणमाह । **ज्ञेयोऽन्यो मातृको लृजुः** । अनुस्वरादिरहितो अन्यो मातृको एकमात्रो वर्णो लघुर्भवति । स च प्रस्तारे ऋजुः सरलः । ९

युक्तपराश्च य इत्यनेन प्राप्ते गुरुत्वे अपवादमाह ।

पदादाविह[12] वर्णस्य संयोगः क्रमसंज्ञिकः ।
पुरःस्थितेन[13] तेन स्याल्लघुताऽपि क्वचिद्गुरोः ॥ १०

विभक्त्यंतं **पदं** तस्य पदस्यादौ वर्तमानो यो **वर्ण**स्तस्य **संयोगः** । स इह शास्त्रे **क्रमसंज्ञो** ज्ञेयः । **तेन** क्रमेण पुरोवर्तिना प्राक्पदांते वर्तमानस्य प्राप्त**गुरु**भाव**स्यापि लघुता** स्यात् । **क्वचिल्ल**क्षानुरोधेन । ननु क एषः[14] **क्रमो** नाम **संयोग** उच्यते । पूर्वाचार्याणां पिंगलनागप्रभृतीनां कालिदासादीनां च कवीनां समयः[15] परिगृहीतः । संयोगः क्रमसंयोगः । १०

तत्र **ग्रसंयोगेन[16] यथा** । इदमस्योदाहरणम् ।

तरुणं सर्षपशाकं नवौदनं पिच्छलानि च दधीनि ।
अल्पव्ययेन सुंदरि ग्राम्यजनो मिष्टमश्नाति[17] ॥ ११

ह्रसंयोगेन यथा ।
तव ह्रियापह्रिया मम ह्रीरभूत् शशिगृहेऽपि ह्रतं न धृता ततः ।
वहलभ्रामरमेषकतामसम् मम प्रिये क्व स येष्यति तत्पुनः ॥ इति
निद्रव्यो ह्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसः[18]
निस्तेजः[19] परिभूयते परिभवान्निर्वेदमागच्छति ।
निर्विण्णः शुचमेति शोकविवशो बुद्ध्याः[20] परिभ्रश्यते

---

[11] शिशुपालवधम् १.१
श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।
वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ।।
[12] पाठे पादादाविह । टीकायां पदादाविह ।
[13] पाठे पुरस्थितेन ।
[14] पाठे एष ।
[15] पाठे समय ।
[16] पाठे ग्रसंयोगेण ।
[17] पाठे मिष्टमुश्नाति ।
[18] पाठे तेजसा ।
[19] पाठे निस्तेजाः ।
[20] पाठे बुद्ध्या ।

निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥[21]
ममैव ते हृते[22] । यथा ।
स्नेहाद्रेहाद्भुजगतनयालोककौतूहलेन स्थूलोत्तुंगस्तनभरलसन्मध्यभंगानपेक्षाः ।
पौरा नार्यस्तरलनयनानन्दमुत्पादयन्त्यो धावन्ति स्म द्रुतमपह्रियः स्रंसमानोत्तरीयाः ॥
इति ।
बोधप्रदीपेऽपि यथा ।
यज्ञैर्येषां प्रतिपदमियं मण्डिता भूतधात्री
निर्जित्यैतद्भुवनवलयं यैः प्रदत्तं द्विजेभ्यः[23] ।
तेऽप्येतस्मिन् गुरुभवहृदे[24] बुद्बुदस्तम्भलीलं[25]
धृत्वा धृत्वा सपदि विलयं भूभुजः संप्रयाताः ॥
शिशुपालवधे यथा ।
प्राप्तनाभिहृदमज्जनमाशु[26] प्रस्थितं निवसनग्रहणाय ।[27] इति ।

भ्रसंयोगेन[28] यथा ।
शशिमुखि भ्रमरोऽयं पद्मबुद्ध्याऽऽननं ते ।
समभिलषति पातुं त्यक्तवल्लीप्रसूनः ॥
तथा च ।
भ्रमति भ्रमरमारीकानने विप्रमुक्ते । इत्यादि ।
वरतरुकुसुमेषु[29] व्योमगंगाम्बुजेषु त्रिदशकरिकटेषु स्ववर्वधूकुंतलेषु ।
स्थितशयितविबुद्धप्रीतिकस्ते[30] भ्रमोऽयं भ्रमसि भ्रमर येन त्वं मुधा केतकेषु ॥
पदादाविति किम् । अन्यत्र मा भूत् ।

ग्रसंयोगेन यथा ।
असमग्रविलोकनेन किं ते दयितं पश्य वरोरु[31] निर्विशंका ।

---

[21] हितोपदेशः १.१२९
[22] अस्पष्टम् ।
[23] पाठे द्विज्येभ्यः ।
[24] पाठे तेऽप्येतस्मिनुगुरुभवहृदे ।
[25] पाठे बुद्बुदस्तंवलीलं ।
[26] शिशुपालवधे प्राप्य नाभिनदमज्जनमाशु ।
[27] शिशुपालवधम् १०.६०
प्राप्य नाभिनदमज्जनमाशु प्रस्थितं निवसनग्रहणाय ।
औपनीविकमरुन्ध किल स्त्री वल्लभस्य करमात्मकराभ्याम् ॥ १०.६० ॥
[28] पाठे भ्रसंयोगे ।
[29] पाठे वरुतरुकुसमेषु ।
[30] पाठे स्थितशयितविबुद्धंप्रीतिकस्तेभ्रमयं ।

न हि जातु कुशाग्रपीतमम्भः सुचिरेणापि करोत्यपेततृष्णम् ॥ इति

ह्रसंयोगेन यथा ।

'आजह्रतुस्तच्चरणौ पृथिव्यामि'ति[32] ।

तथा च ।

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे[33] ।

भ्रसंयोगेन यथा ।

कुन्दावदातैर्भवतो यशोभिः शुभ्रीकृतं किं परमारवीर ।

अद्यापि यद्बिभ्रति कालिमानमरातिनारीवदनोत्पलानि ॥ इत्यादि ।

क्वचिदिति किम् । सर्वत्र मा भूत् ।

ग्रसंयोगेन यथा ।

'मही पादघाताद्व्रजति सहसा संशयपदम् ।

पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहणमि'ति[34] ॥

भ्रसंयोगेन यथा ।

'तत्र भ्रमत्येव मुधा षडंध्रिरि'ति[35] ।

केचित्पादादाविति मन्यन्ते । तदसंगतम् । सूत्रोदाहरणयोर्घटनाभावात् ।

तथापि ।

---

[31] पाठे ववरोरु ।

[32] कुमारसंभवम् १.३३

अभ्युन्नताङ्गुष्ठनखप्रभाभिर्निक्षेपणाद्रागमिवोद्गिरन्तौ ।

आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम् ॥

[33] मेघदूतम् १.३४

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे

हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।

अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पाद्

इत्यागन्तून्रमयति जनो यत्र बन्धूनभिज्ञः ॥

[34] पाठे वष्णोर्भ्राम्यद्भ्रजपरिघरुग्णग्रहगणमिति ।

शिवमहिम्नस्तोत्रम् १६

मही पादाघाताद् व्रजति सहसा **संशयपदम्** । पदं विष्णोर्भ्राम्यभ्दुजपरिघरुग्णग्रहणम् ॥

मुहुर्द्यौर्दौःस्थ्यं यात्यनिभृतजटाताडिततटा । जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥

[35] शृङ्गारशतकम् ११

लीलावतीनां सहजा विलासास्त एव मूढस्य हृदि स्फुरन्ति ।

रागो नलिन्या हि निसर्गसिद्धस्तत्र भ्रमत्येव मुधा षडङ्घ्रिः ॥

तरुणं सर्षपशाकं नवोदनं पिच्छलानि दधीनि ।
अल्पव्ययेन सुंदरि ग्राम्यजनो मिष्टमश्नाति[36] । इत्युदाहरणमार्यया प्रदर्शितम् । आर्यायां पादव्यवस्था नास्ति । पूर्वार्धोत्तरार्धग्रहणात् पूर्वार्धोत्तरार्धमित्यार्यालक्षणं कुर्वाणो ग्रन्थकार एवं ज्ञापयति । तावदार्यायां पादव्यवस्था नास्ति पैंगलीयसूत्रपाठाच्च ।
स्वराऽर्धञ्चार्यार्धमिति[37] । **तस्मात्पदादाविति पाठः** । श्रेयानित्यलमिति प्रसंगेन ॥ ११

अथ संज्ञामाह ।

अब्धिभूतरसादीनां ज्ञेयाः संज्ञास्तु लोकतः ।
ज्ञेयः पादः चतुर्थांशो यतिर्विच्छेदसंज्ञिता ॥ १२

तद्यथा । चत्वारोऽब्धिवेदाः । पञ्च शरेन्द्रियाणि । षट्चर्तवः[38] । सप्त स्वरर्षयः । अष्टौ वसवः । नव नंदरन्ध्राणि । दश दिशाः[39] । एकादश रुद्राः । द्वादशादित्याः । त्रयोदश विश्वेदेवाः । चतुर्दश भुवनानि । पञ्चदश तिथय[40] इत्यादि ।

पादलक्षणमाह ।
ज्ञेयो पादः चतुर्थांशो । वक्ष्यमाणलक्षणस्य वृत्तस्य चतुर्थांशो भागः पादसंज्ञो भवेत् ।

अथ यतिमाह ।
यतिर्विच्छेदसंज्ञिता[41] । यतिर्विरामादिराचार्यपारंपर्यागता संज्ञेयमध्यात्पदच्छिन्नाक्षरेषु कर्तव्या । अब्ध्यादि शब्दाद्धि सांकाः[42] कृत्वा यतिरित्यनेन सह संबध्यन्ते[43] ।
इत्ययमर्थः शिष्यन्ति ।
तत्राहुराचार्याः ।
“**यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषतः ।
समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके**[44] **॥
क्वचित्तु**[45] **पदमध्येऽपि समुद्रादौ यतिर्भवेत् ।**

---

[36] पाठे मिष्टमष्णाति ।
[37] पिंगलसूत्र ४.१४
स्वरा अर्धञ्चार्यार्धम्।
[38] पाठे षट्सर्तवः ।
[39] पाठे दिशा ।
[40] पाठे तिथयेत्यादि ।
[41] पाठे यतिर्विश्रामसंज्ञता ।
[42] पाठे शब्दा-सांकाभ्यामन्तर्गतं किञ्चित्प्रोज्झितमष्पष्टं च ।
[43] पाठे संबंध्यन्ते ।
[44] पाठे व्यक्तव्यक्तविभक्तिके ।
[45] पाठे क्वाचित्तु ।

यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥
पूर्वांतवत्स्वरः संधौ[46] क्वचिदेव परादिवत् ।
दृष्टव्यो यतिचिन्तायां[47] यद्यादेशः परादिवत् ॥
[नित्यं प्राक्पदसंबद्धाश्चादयः प्राक्पदान्तवत् ।
परेण नित्यसंबद्धाः प्रादयश्च परादिवत् ॥][48] ”[49]

यतिः सर्वत्र पादान्ते ।
यथा ।
श्रियः श्रेयकपोलौ तु सम्पूर्णेन्दुसमप्रभौ
प्रतिबिम्बं[50] हरेर्यत्र कस्तूरी मण्डनायते । इत्यादिनेत्वेवं यथा ।
नमस्तस्मै महादेवाय शशिखण्डधारिणे[51] । इति ।

श्लोकार्धे तु विशेषतः ।
यथा ।
राजसेवां विनाऽस्माकं गुणो निष्फलतामगात्[52] ।
अंतःपुरपुरन्ध्रीणां अनर्घ्यामिव मण्डनम् ॥ इति ।

---

[46] पाठे पूर्वान्तवत्स्वरसंधौ ।
[47] पाठे अस्पष्टमस्ति । वृत्तमौक्तिकस्थः पाठः ।
[48] पाठे नास्ति । टीकायां विवरणमस्ति ।
[49] राजस्थानप्राच्यविद्याप्रतिष्ठानप्रकाशितराजस्थानपुरातनग्रन्थमालायां ७९तमे ग्रन्थे वृत्तमौक्तिके यतिनिरूपणप्रकरणे

अथाभिधीयते चात्र यतिर्विच्छेदसंज्ञिता।
विरामधृतिविश्रामावसानपदरूपिणी॥१॥
समुद्रेन्द्रियभूतेन्द्ररसपक्षदिगादयः।
साकांक्षत्वादिमे शब्दा यत्या सम्बन्धमात्रिताः॥२॥
तस्मात्तु लक्षणं सम्यगुच्यते वृत्तमौक्तिके।
आलोच्य मूलशास्त्राणि सोदाहरणमञ्जसा॥३॥
यतिः सर्वत्र पादान्ते श्लोकस्यार्धे विशेषतः।
समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके॥४॥
क्वचित्तु पदमध्येऽपि समुद्रादौ तथैव च ।
अत्र पूर्वापरौ भागौ न स्यातामेकवर्णकौ।।५॥
पूर्वान्तवत् स्वरः सन्धौ क्वचिदेव परादिवत्।
द्रष्टव्यो यतिचिन्तायां यणादेशः परादिवत्।।६॥
नित्यं प्राक्पदसम्बन्धाश्चादयः प्राक्पदान्तवत्।
परेण नित्यसम्बन्धाः प्रादयश्च परादिवत्॥७॥

[50] पाठे प्रतिबिम्बहरेर्यत्र ।
[51] पाठे शशिषण्डधारिणे ।
[52] पाठे निःफलतामगात् ।

अगादित्यंत्यव्यञ्जनस्यांतःपुरेणेत्यकारेण[53] सह संधिर्न भवति ।
समासेऽपि न त्वेवं यथा ।
सुरासुरशिरोरत्नस्फुरच्चरणमञ्जरी-
पिंजरीकृतपादाब्जद्वन्द्वं वन्दामहे शिवमिति ।

समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके ।
व्यक्तविभक्तिके[54] प्रकटविभक्तिके । अव्यक्तविभक्तिके[55] समासान्तविभक्तिके ।
तयोरुदाहरणं यथा ।
'यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु'[56] इति ।
व्यक्ताव्यक्तविभक्तिक इति यतिः सर्वत्र पादान्त[57] इत्यनेन सह संबध्यते ।
वस्त्रीकृतजगत्कालं कण्ठेकालं नमाम्यहम् ।
महाकालं कलाशेषं शशिलेखाशिखामणिम् ॥
अपि च ।
नमस्तुंगशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरीरंभमूलस्तम्भाय शम्भवे ॥

क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत् ।
यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥
यथा ।
'पर्याप्तं तप्तचामीकरकटकतटे श्लिष्टशीतेतराशा'विति ।
समुद्रादाविति[58] किम् । पदमध्ययतिर्पदान्ते मा भूत् । यथा ।
'प्रणमत भवबंधक्लेशनाशाय नारायणचरणसरोजद्वन्द्वमानं दहेतु'रिति ॥

पूर्वोत्तरभागयोरेकाक्षरत्वे[59] तु पदमध्ये यतिर्दुष्यति । यथा ।
'एतस्या गण्डतलममलं गाहवे चन्द्रकक्षा'मिति ।

---

[53] पाठे त्रागादित्यंत्यव्यञ्जनस्यांतःपुरेणेत्यकारणे ।
[54] पाठे व्यक्तविभके ।
[55] पाठे अव्यक्तर्विभक्तिके ।
[56] मेघदूतम् १.१
कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥
[57] पाठे पदान्त ।
[58] पाठे समुद्रादिति ।
[59] पाठे पूर्वेतरभागयोरेकाक्षरत्वे ।

‘एतासां राजति सुमनसां दामकण्ठावलम्बी’ति ।
‘संतापं मे जनयति नितम्बोऽयमिन्दीवराक्ष्या’ इति ।

पूर्वान्तवत्स्वरः संधौ क्वचिदेव परादिवत् ।
अस्यार्थः । यो यं पूर्वपरयोरेकदेशः स्वरसंधौ विधीयते स क्वचित्पूर्वान्तवद्भवति क्वचित्परस्यादिवत् ।
पूर्वान्तवद्यथा ।
स्यादस्थानेऽपगतयमुनासंगमे वाऽभिरामा । तथा ।
जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुम् इति ।
परादिवद्भावो यथा । ममैव व्यायोगे ।
ये स्वारातिविदारितास्यसहसैवाभूद्विभिन्नं रणे
वामांगं कलकिंकणीफलकवन्निस्तृंशवद्दक्षिणम् ।
एकं घातनिपातदत्तमितरद्घातप्रतीकारकृद्-
धन्यः पश्यति युध्यमानमिति सस्वांगं विमानस्थितः ॥ इत्यादि ।

यद्यादेशः परादिवद् ।
यथा ।
‘सप्तर्षिहस्तावचितावशेषण्येऽधो विवस्वानि’ति ।
आदिशब्दात् ‘विततघनतुषारः क्षोदशुभ्रांशुवर्त्म[60] स्वविरले’त्यादि ।

नित्यं प्राक्पदसंबद्धाश्चादयः प्राक्पदान्तवत्[61] ।
तेभ्यः पूर्वा यतिर्न कर्तव्येत्यर्थः । यथा ।
‘स्वादुःस्वच्छंदसलिलमिदं प्रीतये कस्य न स्यादि’ति ।

परेण नित्यसंबद्धाः प्रादयश्च परादिवत् ।
तेभ्यः परा यतिर्न कर्तव्येत्यर्थः । यथा ।
‘दुःखं मे प्रक्षिपति हृदये दुःसहस्तद्वियोगः’ इत्यादि सर्वमूह्यम् ॥ १२

युक्समं विषमं चायुक्स्थानं सद्भिर्निगद्यते ।१३(१)

प्रथमतृतीयादिकं स्थानं **अयुक् विषमं** द्वितीयचतुर्थादिकं स्थानं **युक्सममि**ति ।

अथ वृत्तभेदानाह ।

---

[60] पाठे क्षोदसुभ्रांशुवर्त्म ।
[61] पाठे प्राक्पदान्तवत्सु ।

सममर्धसमं वृत्तं विषमं च तथा परम् ॥ १३(२)

छन्दसि वर्तत इति । **वृत्तं** वक्ष्यमाणलक्षणं त्रिधा भवति । **सममर्धसमं विषमं चे**ति । तत्र समं सर्वावयवत्वात्समम्[62] श्रीप्रभृति[63] अर्धसममुपचित्रादि विषमं पदचतुरूर्ध्वादि ।

एतेषां प्रत्येकं लक्षणमाह ।

अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ।
तच्छंदशास्त्रतत्त्वज्ञा समं वृत्तं प्रचक्ष्यते ॥ १४

यस्य वृत्तस्य **चत्वारो**ऽपि पादाः[64] समलक्षणभाजो भवन्ति । त**द्वृत्तं समं** छन्दोविद्भिराचक्ष्यते ।

अथार्धसममाह ।

प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ।
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते ॥ १५

यस्य वृत्तस्य प्रथमतृतीयपादौ तुल्यलक्षणौ भवतः । द्वितीयचतुर्थौ च । त**द्वृत्तं अर्धसम**मुच्यते ।

विषमलक्षणमाह ।

यस्य[65] पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥ १६

यस्य वृत्तस्य चतुर्ष्वपि पादेषु भिन्नमन्यादृशं परस्परं लक्षणं भवति **तद्विषम**मित्याहुराचार्याः ।

अथ वृत्तानां पादं नियमन्नाह ।

आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्धितैः ।
पृथक्छन्दो भवेत्पादैर्यावत्षड्विंशतिं गतम्[66] ॥ १७

---

[62] पाठे सर्वावयवात्त्वात्समम् ।

[63] पाठे श्रीःप्रभृति ।

[64] पाठे पदाः ।

[65] पाठे यस्या ।

[66] पाठे गतिम् ।

एकाक्षरात्पादादेकैकाक्षरवृद्ध्या पादैः **छन्दः** स्यात् । किं **यावद्गतं षट्विंशत्य**क्षरमुत्कृतिं यावत् ।

तदूर्ध्वं चण्डवृष्ट्यादि दण्डकाः[67] परिकीर्तिताः । १८(१)

षड्विंशत्याक्षरोत्कृतिजातेरूर्ध्वं **चण्डवृष्टि**प्रभृतयो **दण्डकाः** भवन्ति । शेषमिति प्रकरणम् । तच्च शास्त्रान्तरेभ्योऽवगन्तव्यम् । ग्रन्थगौरवभयात्केदारेणात्र नोक्तम् ।

गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥ १८(२)

शेषं जातिप्रकरणानन्तरं त्रिपद्यः षट्पद्यो **गाथाः** स्युः ।

अथ छन्दसां जातीराह ।

उक्तात्युक्ता तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका ।
गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च ॥ १९
त्रिष्टुप् च जगती चैव तथाऽतिजगती मता ।
शर्करी सातिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृतेः ॥ २०
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः सङ्कृतिश्चैव तथाभिकृतिरुत्कृतिः ॥ २१
इत्युक्ता छंदसां संज्ञाः क्रमशो वच्मि साम्प्रतम् ।
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥ २२

एकाक्षरा **उक्ता** । द्व्यक्षरा **अत्युक्ता** । त्र्यक्षरा **मध्या** । चतुरक्षरा **प्रतिष्ठा** । पंचाक्षरा **सुप्रतिष्ठा** । षडक्षरा **गायत्री** । सप्ताक्षरा **उष्णिक्** । अष्टाक्षरा **अनुष्टुप्** । नवाक्षरा **बृहती** । दशाक्षरा **पंक्तिः** । एकादशाक्षरा **त्रिष्टुप्** । द्वादशाक्षरा **जगती** । त्रयोदशाक्षराऽ**तिजगती** । चतुर्दशाक्षरा **शर्करी** । पंचदशाक्षरा **अतिशर्करी** । षोडशाक्षरा **अष्टिः** । सप्तदशाक्षरा **अत्यष्टिः** । अष्टादशाक्षरा **धृतिः** । एकोनविंशत्यक्षरा **अतिधृतिः** । विंशत्यक्षरा **कृतिः** । एकविंशत्यक्षरा **प्रकृतिः** । द्वाविंशत्यक्षरा **आकृतिः** । त्रयोविंशत्यक्षरा **विकृतिः** । चतुर्विंशत्यक्षरा **संकृतिः** । पंचविंशत्यक्षरा **अभिकृतिः** । षड्विंशत्यक्षरा **उत्कृतिः** । इति छंदसां संज्ञा उक्ताः ।

---

[67] पाठे दण्डका ।

अधुना सर्वेषां वृत्तानां लक्षणमभिधास्यामि । लक्ष्यते ज्ञायते अनेनेति **लक्षणम्** । परं **मात्रावृत्तानुपूर्वकम्** । मात्रावृत्तान्यार्याप्रभृतीनि प्रथममुक्त्वेत्यर्थः । १९-२२

इति सुल्हणविरचितायां सुकविहृदयानंदिन्यां वृत्तरत्नाकरछंदोवृत्तौ प्रथमोऽध्यायः ॥

द्वितियोऽध्यायः

मात्रावृत्ताध्यायः

मात्रावृत्ताध्यायो द्वितीयः प्रारभ्यते ।
मात्रावृत्तानुपूर्वकमित्युक्तत्वात् ।

लक्ष्मैतत्सप्त गणा गोपेता [68] भवति नेह विषमे जः ।
षष्ठोऽयं [69] च नलघु वा प्रथमेऽर्धे नियतमार्यायाः ॥ १
षष्ठे [70] द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः ।
चरमेऽर्धे पंचमके तस्मादिह भवति षष्ठो लः ॥ २

आर्याया एतल्लक्ष्म लक्षणम् । **सप्त** चतुष्कला **गणा** गुरुणा **उपेता** युक्ता भवन्ति । सामान्येनाभिधाय विशेषमाह । **भवति नेह विषमे जः** इति । इह आर्यालक्षणे विषमे स्थाने प्रथमतृतीयादौ जो जगणो न भवति । **षष्ठश्चायं** जगणो भवति । **नलघु वा** । नगणयुक्तो लघु वा भवति । **नियतं** निश्चित**मार्यायाः** । **प्रथमेऽर्धे** आद्ये दले इति । **चरमेऽर्धे** द्वितीयेऽर्धे **षष्ठो ल**घुरेवेति नियमः । एवमुभयोरप्यर्धयोर्लक्षणमभिधाय पदनियममाह । **षष्ठे द्वितीयलादि**ति । षष्ठे गणे सर्वलघौ द्वितीयाल्लघ्वक्षरादारभ्य पदं भवति । सप्तमश्चेत्सर्वलघुगणो भवति तदा प्रथमाक्षरादारभ्य पदं **चरमेऽर्धे पंचमके** द्वितीयेऽर्धे पंचमे सर्वलघौ गणे तस्मात्पूर्वोक्तात् । प्रथमाक्षराल्लघ्वक्षरादारभ्य पदनियमो भवति । इति । अत्रार्धग्रहणात्पादव्यवस्था नास्तीति एतच्च प्रथमाध्याय एव पदादाविति सूत्रे प्रपंचितमस्ति ।
क्रमेणोदाहरणं[71] यथा ।
वंदारुदेववृन्दैरहमहमिकया सदैव या वंद्या ।
स्वर्गापवर्गदात्रीं तामार्यां संततं नौमि ॥
इत्युदाहरणं यथा ।
यस्यांगनामुवेद्या[72] कोकिलनादश्च मलयगिरिपवनः ।
एकैकमस्त्रकृत्यं करोति स जयति मनोजन्मा ॥ १-२

---

[68] पाठे गोपिता ।
[69] पाठे षष्ठोऽयं ।
[70] पाठे षष्टे ।
[71] पाठे क्रमेणोदाहरणो ।
[72] पाठे अतीव अस्पष्टम् ।

त्रिष्वंशकेषु[73] पादो दलयोराद्येषु दृश्यते यस्याः ।
पथ्येति नाम तस्याश्छन्दोविद्भिः समाख्यातम् ॥ ३

यस्या आर्याया **आद्येषु**[74] **त्रिषु** गणेषु **पादो** विरामो भवति । सा **पथ्या नाम** । यथा ।
उज्झितनेपथ्यालकमुज्झिततिलकांजनं यदेणाक्ष्याः ।
तस्याः स्मरामि विरहप्रारम्भे वदनमपि रम्यम् ॥ ३

संलंघ्य गणत्रयमादिमं सकलयोर्द्वयोर्भवति पादः ।
यस्यास्तं पिंगलनागो विपुलामिति समाख्याति ॥ ४

यस्या आर्याया आद्य**गणत्रय**मभिलंघ्य **द्वयो**रप्यर्धयोः **पादो** विरामो यतिर्भवति । सा **विपुला** नाम यथा ।
मम खलु न याति नयनयुगमचलनिर्मेषपिश्यतस्तृप्तिम् ।
त्रस्तमृगशिशुदृशस्तन्वंग्या जघनस्थलीं विपुलाम् ॥

सामान्येन विधानमेतदाद्यंतोभयभेदपूर्वकत्वात्त्रिधा भवति ।
तत्रादिविपुला यथा ।
प्रमदानां जयति कटाक्षोऽयं निशि स्फुरत्स्मरशराभः ।
हृदयस्थितानुरागप्रकटनपटुतां दधात्स्वैरं ॥
अन्त्यविपुला यथा ।
प्रीतिं कस्य न जनयति प्रकुर्वती केशबंधनं नारी ।
दर्शितभुजमूलालंकारसुभूतार्द्रनखपंक्तिः ॥
उभयविपुलोदाहरणं पूर्वमेवोदाहृतमिति ।४

उभयार्धयोर्जकारौ[75] द्वितीयतुर्यौ गमध्यगौ यस्याः ।
चपलेति नाम तस्याः प्रकीर्तिता नागराजेन ॥ ५

यस्या आर्याया **उभयोरर्धयोर्द्वितीयतुर्यौ** द्वितीयचतुर्थौ गुर्वोर्मध्यगौ गमध्यगौ गमध्यगाविति । वदता सूत्रकृता गणनियम उक्तः । तथा हि **प्रथमो गणोऽन्तगुरुरेव**

---

[73] पाठे त्रिष्वंसकेषु ।

[74] पाठे आद्ये ।

[75] पाठे उभयोर्धयो जकारौ ।

तृतीयो गणो द्विगुरुरेव पंचमश्चादिगुरुरेवेति[76] **निश्चयः** । शेषं यथा प्रोक्तम् । सा आर्या **चपला नाम** यथा ।
चपलाक्षि मौनमुद्रां[77] त्यजेति संभाषिता मया सुतनुः ।
संजातरोमहर्षा बभूवात्युत्सुका तन्वी ॥ ५

आद्यं दलं समस्तं भजेल्लक्ष्म चपलागतं यस्याः ।
शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥ ६

यस्या आर्याया **आद्यं दल**मर्धं **समस्त**मपि **चपला**या लक्षणं **भजेत्** । **शेषे** उत्तरार्धे पूर्वोक्तलक्षणा **सा मुखचपला** नाम । यथा ।
यस्यात्सिराचितांगी[78] (?) लघुस्तनी पिंगलाक्षियुगला च ।
मुखचपला पुरुषाकृतिरतिदीर्घकृशा परित्याज्या ॥ ६

प्राक्प्रतिपादितमर्धे प्रथमे प्रथमेतरे तु चपलायाः ।
लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥ ७

या आर्या **प्रथमेऽर्धे प्राक्प्रतिपादितं** पूर्वमुक्तं **लक्षणमाश्रयेत् प्रथमेतरे** तु उत्तरार्धे तु[79] **चपलाया** लक्षणं **सा जघनचपला उक्ता विशुद्धधीभि**र्निर्मलबुद्धिभिः । यथा ।
कुंचितलोचनयुगलं समदनमदमोदसुंदरालम्[80] ।
सुरतं स्मरामि तस्या मृगीदृशोः जघनचपलायाः ॥ ७

॥ आर्याप्रकरणम् ॥

आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ।
दलयोः कृतयतिशोभां तां गीतिं गीतिवान्भुजङ्गेशः ॥ ८

आर्यायाः प्रथमेऽर्धे यदुक्तं लक्षणं तद्यदि द्वयोरप्यर्धयोर्भवति तां **गीति**मिति **गीतवान्** उक्तवान् **भुजंगेशः** पिंगलनागः । यथा ।
रोमांचं जनयंती सुखयंती नेत्रयोर्युगं[81] यूनाम् ।

---

[76] पाठे 'तृतीयो गणो द्विगुरुरेव तृतीयो गणो द्विपंचमश्चादिगुरुरेवेति निश्चयः' ।
[77] पाठे चपलाक्षमौनमुद्रां ।
[78] पाठे अस्पष्टमेव ।
[79] पाठे तु न ।
[80] छंदोभङ्गः दृश्यते ।

सद्यो मनांसि मदयति गीतिः स्त्रीणां मदेन मत्तानाम् ॥ ८

आर्याद्वितीयकेंऽशे यद्गदितं लक्षणं तत्स्यात् ।
यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ ९

आर्याद्वितीयेऽर्धे **यल्लक्षण**मुक्तं **तद्यदि** द्वयोरप्यर्धयोर्भवति **तामुपगीति**मिति पिंगलनागो **मुनिर्ब्रूते** । यथा ।
शारदचंद्रोद्योते पायंपायं मधु स्वैरम् ।
पौरस्त्रीभिरभीष्टा[82] क्रियते सोत्कण्ठमुपगीतिः ॥ ९

आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः ।
सोद्गीतिः किल गदिता तद्वद्यत्यंशभेदसंयुक्ता ॥ १०

यस्या आर्याया उत्तरार्धलक्षणं पूर्वार्धे भवति पूर्वार्धलक्षणमुत्तरार्धे सा **उद्गीतिः** ।
यथा ।
मण्डपनगरवधूनामुद्गीतिं वत्समल्लारम् ।
आकर्णयति स नूनं दूरादाभ्येति चन्द्रहरिणोऽपि ॥ १०

आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् ।
इतरत्तद्वन्निखिलं यद्दीयमुदितैवमार्यागीतिः ॥ ११

यद्यार्यायाः पूर्वार्धमुत्तरार्धं च **निधने**ऽवसाने **एकेन गुरुणाधिकेन युक्तं** भवति तदाऽऽ**र्यागीति**र्यथा ।
स्त्रीणां हर्षवतीनां सशिरःकम्पस्तुवन्ति (?) विगतविकल्पाः ।
अप्यार्यागीतिमिमामनेकलयसुन्दरामाकर्ण्य ॥
स्कन्धकमित्यिके[83] । ११

॥ गीतिप्रकरणम् ॥

---

[81] पाठे नेत्रयो युगं ।

[82] पाठे पौरस्त्रिभिरभीष्टा ।

[83] वराहमिहिरकृतबृहत्संहितायाम् १०३.५४ ‘स्कन्धकमार्यागीतिः’ ।

षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो[84] निरन्तराः ।[85] न समाऽत्र पराश्रिता कला वैतालीयेऽन्ते[86] रलौ गुरुः ॥ १२

सिंहावलोकितन्यायेन 'तृतीययुग्दक्षिणान्तिके'त्यादिसूत्रपठितः[87] पादशब्दोऽत्र दृष्टव्यः । पैंगलीयसूत्रपादशब्दोपादानात् । यथा 'वैतालीयं द्विःस्वराऽयुक्पादेषु सर्वोऽन्तला'[88] इति । यत्र **विषमे** पादे प्रथमे तृतीये **षट्कला** मात्रा भवन्ति **समे** पादे द्वितीये चतुर्थे **अष्टौ** कला भवन्ति । **अन्ते**ऽवसाने रगणलघू गुरुः[89] च भवतस्तद्वृत्तं **वैतालीयं** नाम । उत्सर्गेण यथा । क्वचित्प्राये गुरुलघुभावेऽपवादमाह । **न समाऽत्र पराश्रिता कले**ति । **समा** द्वितीयचतुर्थादिका **पराश्रिता** तृतीयपंचमाद्याश्रिता न भवति । समे पादे द्वितीये चतुर्थे निर्गतमंतरं[90] व्यवधानं यासां ता निरन्तरा[91] अंतररहिता लघवो न भवेयुरित्यर्थः । यथा ।

प्रविशत्यनिशं निरर्गला सुपरित्यक्तविभूषणांशुका ।
विरहे तव सा वरांगना वैतालीयमुवाह विभ्रमम् ॥ १२

पर्यन्ते र्यौ तथैव शेषं औपच्छंदसिकं सुधीभिरुक्तम् । १३

षण्णामष्टानां च कलानां **पर्यन्ते**ऽवसाने **र्यौ** रगणयगणौ भवतः । **शेषं** पूर्ववत्तदा वैतालीयमेव **औपच्छंदसिकं** नाम । यथा ।
बहुविप्रियकारकं परोक्षे प्रत्यक्षे प्रियचाटुकारदक्षम् ।
शठवृत्तमिमं द्रुतं वयस्ये औपच्छंदसिकं विमुञ्च कान्तम् ॥ १३

आपातलिका कथितेयं भाद्गुरुकावथ पूर्ववदन्यत् । १४

'यदा षड्विषमेऽष्टौ समे कला'[92] इत्यादि सर्वं **पूर्ववद्भ**वति । विशेषोक्तौ भगणात्परौ गौ गुरू भवतः तदा वैतालीयमे**वापातलिका**[93] नाम । यथा ।

---

[84] पाठे समे स्यु नो ।

[85] पाठे षड्विषमेऽष्टौ समेष्टौ समेऽष्टौ समे कलास्ताश्च समे स्यु नो निरन्तराः ।

[86] पाठे वैतालीयंते ।

[87] वृत्तरत्नाकर २.१५

तृतीययुग्दक्षिणांतिका समस्तपादेषु द्वितीयलः ।

[88] पिंगलसूत्र ४.३२

वैतालीयं द्विःस्वरा अयुक्पादे युग्वसवोऽन्तेर्लगाः ।

[89] पाठे रगणालघुगुरु ।

[90] पाठे निर्गतमंतरे ।

[91] पाठे तानितरा ।

[92] पाठे काला ।

नरनाथ भवंतमरीणां नाशकरं प्रसमीक्ष्य पुरस्तात् ।
रिपवो जहति स्म भयार्ता आपातलिकां संगरभूमिम् ॥
आपातलिकां अस्थिरामित्यर्थः ।
उक्तं च पिंगलवृत्तौ भट्टश्रीहलायुधेन । यथा ।
पिंगलकेशा कपिलाक्षी वाचाटा विकटोन्नतदन्ती ।
आपातलिका पुनरेषा नृपतिकुलेऽपि न भाग्यमुपैति ॥ १४

तृतीययुग्दक्षिणांतिका समस्तपादेषु द्वितीयलः । १५

वैतालीयमेव सर्वेष्वपि **पादेषु द्वितीयो लघु तृतीये**न सह युक्तो भवति 'न समाऽत्र पराश्रिता कले'ति बाधित्वा तदा दक्षिणान्तिका नाम । यथा ।
ववौ मरुद्दक्षिणान्तिको वियोगिनीनां प्राणहारकः ।
प्रकंपिताशोकचम्पके वसन्त एषोऽनंगबोधकः ॥ १५

उदीच्यवृत्तिर्द्वितीयलः सक्तोऽग्र्येण[94] भवेदयुग्मयोः । १६

अयुग्मयोः प्रथमतृतीययोः पादयोः **द्वितीयो ल**घुरग्रिमेन तृतीयेन लघुना सह युज्यते तदा वैतालीयमे**वोदीच्यवृत्ति**र्नाम यथा ।
गिरं मनोज्ञां पिकांगना मुदिताश्विक्यत्स्वयमुद्गिरत्यसौ ।
उदीच्यवृत्तौ दिवाकरे सहकारोऽपि तनोति मञ्जरी ॥ १६

पूर्वेण युतोऽथ पंचमः प्राच्यवृत्तिरुदितेति युग्मयोः । १७

लघुरित्यनुवर्तते । समपादयोर्द्वितीयचतुर्थयोः **पंचमो** लघुः पूर्वेण[95] चतुर्थेन लघुना सह युक्तो यदा स्यात्तदा **प्राच्यवृत्ति**र्नाम वैतालीयं भवति । यथा ।
स्वगुणैरनुरंजितप्रजः प्राच्यवृत्तपरिपालने रतः ।
रणभूमिषु भीमविक्रमो विंध्यवर्मनृपतिर्जयत्यसौ ॥ १७

यदा समावोजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकम् ।१८

---

[93] पाठे आपालिका ।

[94] पाठे उदीच्यवृत्तिर्द्वितीयसक्तोऽग्र्येण ।

[95] पाठे लघुपूर्वेण ।

पूर्वोक्तयोरुदीच्यप्राच्यवृत्त्योः **समौ** सदृशौ **ओजयुग्मकौ** विषमसमौ पादौ **यदा** भवतः तदा वैतालीयमेव **प्रवृत्तकं** स्यात् । यथा ।
प्रवृत्तकान्ते दुःरश्मिभिर्व्याप्तमंबरमिदं[96] विलोक्यताम् ।
गृहाण ताम्बूलमुत्तमं कोपमाशु विजहीहि कोपने[97] ॥ १८

अस्य युग्मरचिताऽपरान्तिका । १९

अस्य प्रवृत्तकस्य समपादकृता समपादलक्षणयुक्तैश्चतुर्भिः पादै **रचिता अपरान्तिका** नाम । यथा ।
तुंगपीवरघनस्तनालसा चारुकुण्डलवती मृगेक्षणा ।
पूर्वचन्द्रवदनाऽपरान्तिका चित्तमुन्मदयतीयमंगना ॥ १९

अयुग्भवा चारुहासिनी । २०

प्रवृत्तकस्यैव विषमपादलक्षणयुक्तैश्चतुर्भिः पादैः रचिता **चारुहासिनी** नाम यथा ।
न कस्य चेतः समन्मथं करोति सा सुंदराकृतिः ।
विचित्रवाक्योक्तिपण्डिता विलासिनी चारुहासिनी ॥ २०

॥ वैतालीयप्रकरणम् ॥

वक्त्रं नाद्यान्नसौ स्यातामब्धेर्यो अनुष्टुभि ख्यातम् । २१

'पाद' इत्यनुवर्तते । **अनुष्टुभ्य**ष्टाक्षरायां जातौ[98] पादस्य चतुर्थादक्षरा**द्यो** यगणो यदा भवति तदा **वक्त्रं** नाम वृत्तं **ख्यातं** कथितम् । **अब्धे**रिति निर्विशेषणत्वेनाद्यादक्षरान्नगणसगणौ न भवतः । यथा ।
अपाण्डुगण्डमाकर्णविशालनयनं सुभ्रु ।
विरहे चारुसर्वांग्यास्तस्याः स्मराम्यहं वक्त्रम् ॥ २१

युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम् । २२

युजोः समपादयोर्चतुर्थादक्षरा**ज्जेन** जगणेन परेण वक्त्रमेव **पथ्ये**ति कीर्तितम् । यथा ।

---

[96] पाठे दुरश्मिभिर्व्याप्तमंबरमिदं ।
[97] पाठे कोपेने ।
[98] पाठे जातो ।

त्वद्दन्तिदन्तलग्नोरुशाखाः पथ्यायताः द्रुमाः ।
कथयन्तीव भग्नानां दिग्जयं तव भूपते ॥ २२

ओजयोर्जेन वारिधेस्तदेव विपरीतादि । २३

विपरितपथ्येत्यर्थः । **युक्पादे**[99] **यगण एव कर्तव्यः** । यथा ।
विपरीतान्यपि प्रियः कुर्वाणो मुदमाधत्ते ।
अनुकूलस्त्वसौ सदा तेन प्राणाधिको नूनम् ॥ २३

चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः । २४

यद्य**युजो**र्विषमयोः पादयोश्चतुर्थादक्षरान्नगणो भवेत् तदा **वक्त्र**मेव **चपला** भवति ।
युक्पादयोर्यगण एव । यथा ।
चपलापांगनयने पक्वबिम्बोष्ठि चन्द्रास्ये ।
स्वाधीनत्वं भज दयितं तारुण्यमस्थिरं यस्मात् ॥ २४

यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता । २५

युक्पादे द्वितीयचतुर्थे लघुः **सप्तमो** यस्याः **सा युग्मविपुला** नाम । ननु पथ्यालक्षणसाम्यात्पुनरुक्तमेतत् । नैवम् । विपुलाधिकारस्येदानीमारभ्यमानत्वात् विनाऽनुत्पत्तिः पथ्यालक्षणं त्वयुक्पादे अवश्यमेव यगणेन भवितव्यम् । अत्र तु न नियमः । यथा ।
अहो कस्यापि धन्यस्य महाकुलप्रसूतया ।
प्रीतिः स्वकान्तया सार्धं विपुला जायते गृहे ॥ २५

सैतवस्याखिलेष्वपि । २६

सैतवस्याचार्यस्य मतेन चतुर्ष्वपि पादेषु सप्तमो लघुः कर्तव्यः । यथा ।
अहो धन्यस्य कस्यचित्सुकवेर्जायते[100] मतिः ।
नूनं ययाधिक्रियते सैतवं काव्यमुत्तमम् ॥ २६

भेनाब्धितो भाद्विपुला । २७

---

[99] पाठे युग्पादे ।
[100] पाठे यायते ।

सैतवस्येति निवृत्तम्[101] । **'चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशे'रित्यनुवर्तते** । **'यस्यां लः सप्तमो युग्मे सा युग्मविपुला मते'ति सर्वमनुवर्तनीयम्** । अयुक्पादयोः प्रथमतृतीययोश्चतुर्थ्यादक्षरात्परयो यगणं बाधित्वा भगणश्चेद्भवति तदा भेनोपलक्षिता विपुला स्यात् **भविपुले**त्यर्थः । यथा ।
विशालाक्षी कामगजकुम्भाम्भविपुलस्तनी ।
मध्यक्षामा हंसगतिः कस्य न स्याद्रतिप्रदा ॥

अयुजोरिति जातिपक्षे द्वयोरपि पादयोर्ग्रहणम् व्यक्तिपक्षे पुनरेकस्य । एकपक्षे पुनः प्रथमस्य तृतीयस्य वा तथा चाहुर्महाकवयः[102] ।
'वटे वटे वैश्रवणश्चत्वरे चत्वरे शिव'[103] इति ।
'यस्य प्रभाद्भुवनं शाश्वते पथि तिष्ठती'[104]ति ।
'उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता'[105] इति महाकविप्रयोगाः ।२७

इत्थमन्या रश्चतुर्थात् । २८

इत्थं पूर्वोक्तप्रकारेणायुक्पादयो**श्चतुर्थाद**क्षरात्परतो रगणो भवति तदा **रविपुला** स्यात् । यथा ।
तथा जितः शत्रुवर्गो राजन् बाहुबलेन ते ।
सहान्तःपुरो यथाऽसौ ततार विपुला नदी ॥
व्यक्तिपक्षे प्रथमपादे यथा ।
[महाकविकालिदासवस्वाग्देवतागुरुम् ।
यज्ञाने विषयाभ्यान्ति दर्पणे प्रतिबिम्बवत् ।][106]
तृतीयपादे यथा ।
कामिनीभिः सह प्रीतिः[107] कस्य नाम न रोचते ।
यदि न स्याद्वारिवीचिचंचलं[108] हत जीवितम् ॥ इति ।२८

---

[101] पाठे निवृत्त ।
[102] पाठे वाहुर्महाकवयः ।
[103] अग्निपुराणम् ३०५.१४
वटे वटे वैश्रवणं चत्वरे चत्वरे शिवम् ।
पर्व्वते पर्व्वते रामं सर्व्वत्र मधुसूदनम् ॥
[104] छंदोभङ्गः दृश्यते ।
[105] रघुवंशम् १०.१३
मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥
[106] पाठनिर्धारणे अशक्तोऽस्मि ।
[107] पाठे प्रीति ।

नोऽम्बुधेश्चेन्नविपुला । २९

अयुक्पादयोश्चतुर्थादक्षराच्चेन्नगणो भवतीति तदा नविपुला स्यात् ।
लीलया येन विपुला दंष्ट्राग्रेणोद्धृता मही ।
बिभ्रता सौकरमपि वपुर्वन्दामि तं हरिम् ॥
अत्रैव भारविकविर्यथा ।
युयुत्सुनेव कवचं[109] किमामुक्तमिदं त्वया ।
तपस्विनो हि वसते केवलाजिनवल्कले ॥[110]
व्यक्तिपक्षे प्रथमपादे यथा ।
तव मंत्रकृतो मंत्रैर्दूरात्संशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः[111] ॥ इत्यादि ॥ २९

तोऽम्बुधेस्तत्पूर्वा भवेत् । ३०

अयुक्पादयोः[112] चतुर्थादक्षराच्चे**त्तगणो** भवति तदा तत्पूर्वं **तविपुले**त्यर्थः । यथा ।
तृष्णेयं रे तात श्रियं संचितां विपुलां हरे –
द्विहाय तस्मात्तां भव सुखी वैराग्यसम्पदा ॥
व्यक्तिपक्षे प्रथमपादे यथा ।
लोकवत्प्रतिपत्तव्यो लौकिकोऽर्थः परीक्षकैः ।
लोकव्यवहारं प्रति[113] सदृशौ बालपण्डितौ ॥[114]

अन्येति ग्रहणात् मगणसगणविपुलाऽपि बोद्धव्या । यथा ममैव छन्दसि ।
'अम्बुधौ नतभरमसा ओजे तद्युतविपुला भवेत्' । यथा ।
सर्वातिरिक्तं सौभाग्यं बिभ्रती चारुलोचना ।

---

[108] पाठे स्याद्वारिवीचीचंचलं ।
[109] पाठे युयुत्सुनेकवचं ।
[110] शिशुपालवधम् ११.१५
युयुत्सुनेव कवचं किमामुक्तमिदं त्वया ।
तपस्विनो हि वसते केवलाजिनवल्कले ॥
[111] रघुवंशम् १.६१
पाठे 'तव मंत्रकृते मंत्रे दूरात्संशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥'
[112] पाठे अयुक्पादयो ।
[113] पाठे प्रीति ।
[114] तत्त्वोपप्लवसिंहे व्याख्यातम् ।

स्त्रीलोकसृष्टिः सौम्येव निः साम्यमस्य वेधसा ॥ (?)
व्यक्तिपक्षे[115] प्रथमपादे यथा ।
मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।[116]
अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम्[117] ॥ इति ।
तृतीयपादे यथा ।
अदूरवर्तिनीं[118] सिद्धिं राजन्विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यदिति ॥[119]
सविपुला यथा ।
क्षणविध्वंसिनि काये का चिन्ता मरणे रणे[120] ।[121] इति ।
सर्वेषां विपुलाभेदानां चतुर्थो वर्णः प्रायेण गुरुर्भवति । इत्याम्नायः ॥ ३०

॥ इति वक्त्रप्रकरणम् ॥

द्विकगुणितवसुलघुरचलधृतिरिति । ३१

द्वाभ्यां गुणिता वसवो अष्टौ **लघव** इत्यर्थः । षोडशभिर्लघुभि**रचलधृति**र्नाम । यथा ।
इतरजनहितमितरमृतरमतिमनवरतमवनितिलकमिव सपदि ।[122]
स्वयमपि जलनिधिजननिरतिलषति पुरुषवरमचलधृतिविभविनमिह ॥

---

[115] पाठे वक्तिपक्षे ।

[116] रघुवंशम् १.३९
मनोभिरामाः श्रुण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ॥

[117] रघुवंशम् १.९३
अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियम् ॥

[118] पाठे अदूरवर्तिनी ।

[119] रघुवंशम् १.८७
अदूरवर्तिनीं सिद्धिं राजन् विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ।

[120] पाठे मरणरणे ।

[121] पराशरस्मृतिः ३.३७
जितेन लभ्यते लक्ष्मीर्मृतेनापि सुराङ्गनाः ।
क्षणध्वंसिनि कायेऽस्मिन्का चिन्ता मरणे रणे ॥

[122] पाठे ३१ एव लघवः सन्ति । अस्पष्टमपि ।

गीत्यार्येति पिंगलः ।३१

मात्रासमकं नवमो ल्गन्तं । ३२

'द्विकगुणितवसुलघु'रित्यनुवर्तते । यदा अचलधृतिरेव गुर्वन्तो भवति नवमोश्च लघुरेव तदा मात्रासमकं नाम ।
प्राक्सूत्राल्लघुरित्यनुवर्तमानेऽपि 'नवमो लि'ति वदता सूत्रकारेणान्येषां लघु वोऽनुज्ञातस्तस्मा'**न्न समाऽत्र पराश्रिता कले**'त्यप्यनुवर्तनीयम् ।अत्रैव सूत्रे लक्ष्यलक्षणत्वात् । यथा ।
धूलीधूसंस्कृततनशोभः[123] प्रकटितनूतनवदनद्वंद्वः ।
प्रमुदितवदनो जटिलशिरस्कः खेलति मात्रासमकं बालः ॥ ३२

जो न्लावथाम्बुधेर्विश्लोकः । ३३

अम्बुधेर्लघुचतुष्टयात्परयो**र्जगणो न्लौ** नगणलघू यदा भवतस्तदा मात्रासमकमेव **विश्लोको** नाम । यथा ।
मुञ्चति तृणमिव गतविकल्पः पुत्रं प्रियमविश्लोकं यतः ।
संग्रामभुवि विजितारिसमूहः[124] क्षोणीमिमां स साक्षदव्यात् (?) ॥३३

तद्युगलाद्वानवासिका स्यात् । ३४

तद्युगलादम्बुधियुगलाल्लघ्वष्टकात्परयो जगणो नगणलघू यदा भवतस्तदा **वानवासिका** भवेत् । यथा ।
कुंकुमपंकानुलिप्तगात्रा मध्यक्षामा विपुलनितम्बा ।
अस्माकं वानवासिका स्त्री चेतःप्रीतिं सपदि विधत्ते ॥ ३४

बाणाष्टनवसु यदि लश्चित्रा । ३५

पंचमोऽष्टमो नवमो यदि चे**ल्लघु**र्भवति तदा **चित्रा** नाम यथा ।
दृष्ट्वा तव रिपुनगरे शून्ये चित्रानि धवलगृहभित्तीनाम् ।
यान्ति द्रुततरमिभयूथातित्रासम् नरवरजनता बुद्ध्या ॥[125] ३५

---

[123] पाठे धूलीधूसांस्कृततनसोभाः ।
[124] पाठे विजितातिसमूहः ।
[125] छंदोभङ्गः दृश्यते ।

अष्टाभ्योऽथ गलावुपचित्रा । ३६

लघ्वष्टकाद्यदा गुरुलघू भवतस्तदा **उपचित्रा** नाम । यथा ।
मानं मानिनि मुञ्च भज त्वं कान्तं यावदितीरितमाल्या ।
तावद्व्योम बभूव पुरस्तान्नक्षत्रैरुपचित्रितमेतत् ॥ ३६

यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमकादिपादैः कलितम् ।
अनियतवृत्तपरिमाणसहितं प्रथितं जगत्सु पादाकुलकम् ॥ ३७

अतीतं प्रागुक्तं **कृतं लक्ष्म** लक्षणं येन तेन **युतैः** सहितैः
मात्रासमकविश्लोकवानवासिकाचित्रोपचित्राणां **पादै**श्चरणैः **कलितं** युक्तं
अनियतवृत्तपरिमाणसहितं अनियतममर्यादं वृत्तानां परिमाणं तेन सहितम् । कोऽर्थः ।
मात्रासमकादीनां पञ्चानामपि पादैर्यैः कैश्चिदपि चतुर्भिः **पादाकुलक**मिति कथितम् ।
अत्र मात्रासमकविश्लोकवानवासिकाचित्रोपचित्राणामुदाहरणम् । यथा ।
दक्षिणमारुतचलिताशोके कोकिलकलरवमुदितालोके ।
मुग्धे मन्मथसुहृदवसन्ते पादाकुलकं याति पतिस्ते ॥
तथा विश्लोकोपचित्रादिपादैर्यथा ।
वाताहतदलपङ्कजनेत्रे असितदुकूलाच्छादितगात्रे ।
कथय सखि त्वं क्व नु मे व्यक्तं पादाकुलकं गच्छसि नक्तम् ॥
एवमन्येऽपि महाकविप्रयोगा यथा ।
चत्वरमण्डपतरुमूलानि संचितसलिलान्यवकूलानि ।
क्वचिदपि न भवति भिक्षाहानिः तत्किं क्रियते मानम्लानिः ॥
अन्ते यमक इत्याम्नायः । ३७

अधुना गुरुलघुप्रमाणमाह ।

वृत्तस्य लो विना वर्णैर्गा वर्णा गुरुभिस्तथा ।
गुरवो लैर्दले नित्यं प्रमाणमिति निश्चितम् ॥ ३८

यस्य कस्यचि**द्वृत्तस्य लः** कला मात्रा **वर्णै**रक्षरै**र्विना** गुरवो भवन्ति । **वर्णा गुरुभिस्तथा** ताः कला गुरुभिर्विना वर्णा न भवन्ति । **गुरवो लैर्दलै नित्यं** ता एव कला लैर्लघुभिर्विना **दले**ऽर्धे कृते सति गुरवो भवन्ति । यथा । अस्मिन्नेव वृत्ते एकपंचाशत्कलावर्णैः द्वात्रिंशद्भिर्विना एकोनविंशतिगुरवोः भवन्ति । पुनस्ता एव मात्रा एकोनविंशत्या गुरुभिर्विना द्वात्रिंशद्भवन्ति । पुनस्ता कला एकपंचाशत्त्रयोदशभिर्लघुभिर्विना

अष्टत्रिंशद्भवन्ति । ततो **दले**ऽर्धे कृते सति एकोनविंशतिर्गुरवो भवन्तीति **प्रमाणं** नियतं वृत्तस्येति ।३८

शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदमखिलम् । सगुरुशकलयुगलकमपि सुपरिघटितललितपदनिचिति भवति शिखा ॥ ३९

शिखिभिस्त्रिभि**र्गुणितैर्दश**भि**र्लघु**भी **रचितं** कृतं तच्च **तदपगतलघुयुगलं** च तथोक्तं अष्टाविंशल्लघुकमित्यर्थः । **अपरं** द्वितीय**मिदमर्धमखिलं** संपूर्णं त्रिंशल्लघुकमित्यर्थः । **शकलयुगलकमपि** अर्धद्वयममपि **सगुरु** सह गुरुणा वर्ततेति सगुरु यदा भवति तदा **शिखा** नाम भवति । **सुपरिघटितानि ललितपदानि** तेषां **निचिती** रचनाविशेषा यत्र क्रियाविशेषणे तत्तथोक्तम् । यथा ।
मलयपवनचलितसुविकचविचिकलमलिरधिवसति मुदितमनाः ।
शुभितसमयमुदितपिकयुवतिरपि[126] परिमलबहुलबकुलतरुशिखा ॥
चूलिकेति वक्तव्ये । छंदोभंगभयाच्छिखेत्युक्तमेकार्थत्वान्न दोषः । ३९

विनिमयविहितशकलयुगललघुललितपदविततिरचितगणनिचया । श्रुतिसुखकृदियमपि जगति जशिर उपगतवति ञि सति भवति खजा ॥ ४०

सैव शिखा **विनिमये**न व्यत्यासेन[127] **विहितं शकलयुगल**मर्धद्वयं **ललितपदवितत्या रचितगणनिचया** यदा भवति तदा **खजा** नाम । क्व **सति** । **ञि** सति । ञि चवर्गीयपंचमस्य चवर्गीयतृतीयस्य **शिर** उर्ध्वविभागस्तस्मि**न्नुपगतवति** । कोऽर्थः । **खञ्जेत्यर्थः** । यथा ।
ससलिलसलिलधरवसुमुदितशिखिकुलविरचितकलकलनिकरे ।
सुपरिहृतनिजयुवतिगृहनभसि हत पथिक कथमसि गमा ॥
एकगुरूणि छंदसि खञ्जाशब्दस्य प्रवेशयितुमशक्यत्वान्नाम नोक्तम् ।४१

अष्टावर्धे गा द्व्यभ्यस्ता यस्याः साऽनङ्गक्रीडोक्ता ।

---

[126] पाठे सुभितसमयमुदितपिकयुवतिरपि ।

[127] पाठे व्यत्यशेन । व्यत्ययेन व्यत्यासेन वा भवेत् ।

दलमपपरमपि वसुगुणितसलिलनिधिलघुकविरचितपदविततिभवति । ४१

द्वाभ्यां गुणिताऽष्टौ गुरवो यस्याः सा षोडशगुरुः प्रथमेऽर्धे त्वपरमप्यर्धं वसुभिरष्टभिर्गुणिताः सलिलनिधिलघव इति[128] द्वात्रिंशत्संख्या लैः रचितपदविततिः[129] अनंगक्रीडा नाम ।
त्यक्तानङ्गक्रीडां मुक्तव्रीडां शत्रुक्षौणीपालाः ।
सुविषमवनभुवि विदधति भयमिव नरवरतिलकसुविजितरिपुनिवहाऽसौ ॥
सौम्येत्येके ।४१

त्रिगुणनवलघुरवसितिगुरुरिति दलयुगलकृततनुरतिरुचिरा । ४२

त्रिभिर्गुणितार्नव लघवो यस्यां सा तथोक्ता सप्तविंशल्लघुरित्यर्थः । **अवसिति**रवसानं तस्मिन् **गुरु**र्यस्याः सा तथोक्ता इति पूर्वोक्तप्रकारेण सप्तविंशल्लघवोऽन्ते गुरुः एवं **दलयुगलकृततनुः** विरचितशरीरा **अतिरुचिरा** नाम । यथा ।
समदगजगतिरुरुकुचयुगकृतनततनुरमलवदनकमला ।
अनवरतमपहरति मम हृदयमिह हि युवतिरियमतिरुचिरा ॥ ४२

॥ इति मात्रासमकप्रकरणम्[130] ॥

इति सुल्हणविरचितायां सुकविहृदयानन्दिन्याभिधानायां वृत्तरत्नाकरच्छंदोवृत्तौ मात्रावृत्ताध्यायो द्वितीयः समाप्तः ॥

---

[128] पाठे सलिलनिधिलघविवितिवो ।
[129] पाठे रचितपदविरतिः ।
[130] पाठे मात्रासमप्रमाणम् ।

तृतीयोऽध्यायः

समवृत्ताध्यायः

उक्तायाम्

श्रीः । १

एकाक्षरायां जातौ एको गुरुर्यस्य वृत्तस्य पादे तद्वृत्तं **श्री**र्नाम । यथा ।
श्रीस्तत्तैलम्[131] । १

अत्युक्तायाम्

गौ स्त्री । २

गुरुद्वयं यत्र तद्वृत्तं **स्त्री** नाम । यथा ।
आद्या सा स्त्री गौरी पायात्[132] । २

मध्यायाम्

मो नारी । ३

यत्र **म**गणस्तद्वृत्तं **नारी** नाम ।
श्रीनारीगोविंदौ भूयास्तवोद्बुद्ध्यै । ३

रो मृगी । ४

यत्र **र**गणस्तद्वृत्तं **मृगी** नाम । यथा ।
कथ्यतां यात्यसौ
गीतगा हा मृगी ॥ ४

---

[131] अस्पष्टमेव । अन्यत्र 'श्रीस्ते सास्तामि'त्युदाहरणम् ।
[132] पाठे आद्यासस्त्रीगौरीपयात् ।

प्रतिष्ठायाम्

म्गौ चेत्कन्या । ५

चेद्यदि पादे मगणगुरू भवतः तद्वृत्तं **कन्या** नाम । यथा ।
कामक्रीडारूढायासा ।
एताः कन्या कीदृश्यास्ताः ॥
तथा च ।
सर्वेषां यः सामान्यर्द्धिः ।
तस्येशस्स्ताद्भूयो वृद्ध्यै ॥ ५

सुप्रतिष्ठायाम्

भ्गौ गिति पंक्तिः । ६

यत्र भगणो द्वौ गुरू भवतः तद्वृत्तं **पंक्ति**र्नाम भवति । यथा ।
व्योमनि नीलां नीरदपंक्तिम् ।
वीक्ष्य विपन्नाः प्रोषितवध्वः ॥ ६

गायत्र्याम्

त्यौ स्तस्तनुमध्या । ७

यत्र तगणयगणौ भवतः तद्वृत्तं **तनुमध्या** नाम । यथा ।
कस्यापि महद्भिः पुण्यैरनुकूला ।
श्यामा तनुमध्या गेहे भवति स्त्री ॥ ७

शशिवदना न्यौ । ८

यत्र नगणयगणौ भवतस्तद्वृत्तं **शशिवदना** नाम । यथा ।
मलयजलेपः कुवलयशय्या ।
दहति वियोगे शशिवदनायाः ॥ ८

त्सौ चेद्वसुमती । ९

चेत्तगणसगणौ पादे भवतः तद्वृत्तं **वसुमती** नाम । यथा ।
पृथ्वी धृतवती राज्ञा नयवता ।
मुद्यज्जनपदा श्लाघ्या वसुमती ॥ ९

उष्णिहि

मधुमतिननगाः । १०

नगणनगणगुरवो यत्र तद्वृत्तं मधुमती नाम । यथा ।[133] १०

म्सौ गः स्यान्मदलेखा । ११

मगणसगणौ गुरुश्च यत्र तद्वृत्तं **मदनलेखा** नाम । यथा ।
लावण्याम्भसि मग्ने तस्याः काममहेभे ।
भ्रष्टेयं स्तनकुम्भाद्रोमलीमदलेखा ॥ ११

कुमारललिता ज्सौग् । १२

जगणसगणौ गुरुश्च यत्र तद्वृत्तं **कुमारललिता** नाम । यथा ।
कुमारललितानि प्रमोदजननानि ।
नयाभिमुदमग्र्यां विलोक्य नमनीका ॥ (?) १२

सरगा हंसमाला । १३

यत्र सगणरगणगुरवस्तद्वृत्तं **हंसमाला** नाम । यथा ।
शरदि प्रेक्ष्य यान्तीं मुदितां हंसमालाम् ।
त्यजति प्रेयसीं कः सुखलिप्सुः स्वतन्त्रः ॥ १३

अनुष्टुभि

मो मो गो गो विद्युन्माला । १४

---

[133] उदाहरणं नास्ति ।

द्वौ मगणौ द्वौ गुरू च यत्र तद्वृत्तं **विद्युन्माला** नाम । यथा ।
चतुर्भिर्यतिः[134] । यथा ममैव छंदसि ।
मौ गौ वेदैर्विद्युन्माला ।
व्योम्नि व्याप्ते तप्तरेखानाकुर्वन्ती वंग्यांमानम्रां त्वां[135] भर्तुः स्त्रीणां जागर्यका विद्युन्माला ॥ (??) १४

भौ गिति चित्रपदा गः । १५

भगणद्वयं गुरू च यत्र तद्वृत्तं **चित्रपदा** नाम । यथा ।

नूपुरशब्दमनोज्ञंताललयान्वितगीतम् ।
पीनपयोधरयुग्मा नृत्यति विचित्रपदेयम् ॥ १५

माणवकं भात्तलगाः । १६

भगणतगणलघुगुरवो यत्र तद्वृत्तं **माणवकं** नाम । यथा ।
वाञ्छसि शं चेद्विपुलं तर्हि सखे मुञ्च शठ –
मेधा किं ज्ञास्य रुचिं[136] मित्रमपि त्वचपलम् ॥ (?)
चतुर्भिर्यतिरित्याम्नायः । **माणवकाक्रीडितमिति पिंगलः** । १६

म्नौ गौ हंसरुतमेतत् । १७

यत्र मगणनगणौ द्वौ गुरू तद्वृत्तं **हंसरुतं** नाम । यथा ।
दृष्ट्वा कासकुसुमानि श्रुत्वा हंसरुतमेतत् ।
कामार्तः शरदि पान्थ कष्टं जीवति निकृष्टः ॥ १७

जौं समानिका गलौ च । १८

रगणजगणौ गुरुलघू च यत्र तद्वृत्तं **समानिका** नाम । यथा ।
ते समानिका च यान्ति शत्रवो भयेन धीर ।
राजसंपदं विहाय यद्यजेयबाहवोऽपि ॥ १८

---

[134] पाठे चतुर्यतिभिः

[135] अशुद्धत्वात्पदविच्छेदः कर्तुमशक्तोऽस्मि ।

[136] पाठे शठमेधाकिंज्ञ(ज्ञा)स्यरुचिं इति । पदविच्छेदे दोषोऽपि भवेत् ।

प्रमाणिका जरौ लगौ । १९

जगणरगणौ लघुगुरू यत्र तद्वृत्तं **प्रमाणिका** नाम । यथा ।
प्रवाति दक्षिणानिलः सुपुष्पिताम्रकिंशुकः ।
वसंत एष सांप्रतं प्रमाणिकाऽत्र कोकिला ॥ १९

[चम्पकमाला चेद्भमसा गः । २०

भगणमगणसगणाः गुरुश्च यत्र तद्वृतं **चंपकमाला** नाम ।**]**[137] २०

[नाराचकं तरौ लगौ । २१

तगणरगणौ लघुगुरू च यत्र तद्वृत्तं नाराचकं नाम । यथा । **]**[138] २१

वितानमाभ्यां यदन्यत् । २२

आभ्यां समानिकाप्रमाणिकाभ्यां **यदन्यद**ष्टाक्षरं छन्दस्त**द्वितानं** नाम । **आभ्यां यदन्यदि**ति ब्रुवन् सूत्रकारो वितानस्यानेकप्रकारत्वं दर्शयति । अन्यथा गणनियमं ब्रूयात् । यथा ।
ज्योत्स्नावितानमैन्दवं[139] पश्य प्रिये मनोरमम् ।
कोपं त्यज प्रियं भज स्त्रीणां प्रियं हि यौवनम् ॥
अन्यच्च ।
तस्याः स्मरामि सुंदरं चन्द्रोपमानमाननम् ।
कंदर्पचापभंगुरं श्रुतिभ्रमोपशोभितमिति ॥
अपि च ।
कंकालमालधारणं कंदर्पदर्पहारिणम् ।
संसारबन्धमोचनं वंदामहे त्रिलोचनम् ॥

‘अन्यदतो हि वितानमि’ति श्वेतपटजयदेवेन यदुक्तम् । [140]
इत्यनेन गतार्थत्वात् । २२

---

[137] ‘वसंत’’एष’मध्ये पाठे दृश्यते । उदाहरणं नास्ति ।

[138] उदाहरणं नास्ति ।

[139] पाठे ज्योत्स्नावितानमैंदवं ।

[140] पाठे अत्र ‘भौ गिति चित्रपदा गः’ इति दृश्यते । तदसंगतत्वान्न निर्दिष्टम् ।

बृहत्याम्

रान्नसाविह हलमुखी । २३

यत्र रगणनगणसगणास्तद्वृत्तं **हलमुखी** नाम । यथा ।
निंदितां वपुषि पुरुषद्वेषिणीं विरदशनाम्[141] ।
तां सखे परिणयविधौ दूरतस्त्यज हलमुखीम् ॥ २३

भुजगशिशुभृता नौ मः । २४

द्वौ नगणौ मगणश्च यत्र तद्वृतं **भुजगशिशुभृता** नाम । **सप्तभिर्यतिरित्याम्नायः** । यथा ।
वरतरुलवलीवल्लीकिसलयगहनछिन्नाः[142] ।
भुजगशिशुभृता रम्या मलयगिरिवनोद्देशाः ॥ २४

पंक्तौ

म्सौ ज्गौ शुद्धविराडिदं मतम् । २५

मगणसगणजगणा गुरुश्च यत्र तद्वृत्तं **शुद्धविराट्** नाम । यथा ।
कुर्वन् राज्यमपीह संततं कामक्रोधविवर्जितः सदा ।
मित्रो मे न समोभयानतः(?) सत्यं शुद्धविराडसि प्रभो ॥ २५

म्नौ य्गौ चेति पणव नामेदम् । २६

यत्र मगणनगणयगणा गुरुश्च यत्र तद्वृत्तं **पणव** नाम । **पञ्चभिर्यतिः** । यथा ।
यासां वक्ष्यसि घनवक्षोजे हारः संप्रति शुशुभे तारः ।
पादौ नूपुररववाचालौ भ्रातस्ताः पणवनिताः पश्य ॥ २६

ज्रौ रगौ मयूरसारिणी स्यात् । २७

रगणजगणरगणा गुरुश्च यत्र तद्वृत्तं **मयूरसारिणी** नाम । यथा ।

---

[141] अपूर्णपादाच्छंदोभंगः भवतीह ।

[142] पाठे वरतरुलवलावल्लीकिसलयगहनछिन्ना ।

विस्तारेण बर्हिभाररम्या बर्हिणी मयूरसारणीयम् ।
गर्जितं निशम्य वारिदानां नृत्यति प्रमोदनिर्भराङ्गी ॥ २७

भ्मौ सगयुक्तौ रुक्मवतीयम् । २८

भगणमगणसगणा गुरुश्च[143] यत्र तद्वृत्तं **रुक्मवती** नाम । यथा ।
चेतसि यस्या जीवितनाथस्तत्प्रियकार्यासक्तमनस्का ।
देवगुरुश्वश्रूद्विजभक्ता रुक्मवती स्यात्कीर्तिमती वा ॥ २८

ज्ञेया मत्ता मभसगयुक्ता । २९

मगणभगणसगणगुरवो यत्र तद्वृत्तं **मत्ता** नाम । **चतुर्भिर्यतिरित्याम्नायः** । यथा ।
यच्चूताग्रे स्मरशरबंधौ बद्धावासा पिकसहवयः ।
गायन्त्येताः कलमिति मत्तास्तन्मध्येऽहं सखि मधुरेषः ॥ २९

नरजगैर्भवेन्मनोरमा । ३०

यत्र नगणरगणजगणगुरवो तद्वृत्तं **मनोरमा** नाम । यथा ।
युवतिरिंदुसुंदरानना पृथुघनस्तनी कृशोदरी ।
गुरुनितम्बभारमंथरा हरति मे मनो मनोरमा ॥ ३०

त्जौ जो गुरुणेयमुपस्थिता । ३१

तगणजगणौ जगणो गुरुश्च तद्वृत्तं **उपस्थिता** नाम । **अत्र द्वाभ्यामष्टभिश्च यतिरित्येके** ।
यथा ।
त्यक्त्वा[144] निजशस्त्रमुपस्थिता[145] ये प्रांजलयस्तव शत्रवः ।
तेषामवनीश्वर जीवितं दत्तं भवता समराजिरे ॥ ३१

त्रिष्टुभि

स्यादिन्द्रवज्रा यदि तौ जगौ गः । ३२

---

[143] पाठे गुरश्च ।
[144] पाठे त्यक्ता ।
[145] पाठे निजशास्त्रमुपस्थिता ।

यत्र तगणौ द्वौ जगणो गुरू च तद्वृत्तं **इन्द्रवज्रा** नाम । यथा ।
स्यादिन्द्रवज्रादि कर्कशं मे
चेतो यदीये विरहागमेऽस्मिन् ।
नूनं तदानीं यदि तद्वियोग-[146]
संतापसंयत्सहनक्षमः स्याम् ॥ ३२

उपेन्द्रवज्रा जतजास्ततो गौ । ३३

यत्र जगणतगणजगणा द्वौ गुरू च तद्वृत्तं **उपेन्द्रवज्रा** नाम । यथा ।
उपेन्द्रवज्रादि महाभिघाता
प्रयान्ति नाशं स्मरतो नरस्य ।
अहर्निशं त्वां विजितामरेश[147]
श्रीकृष्ण विष्णोर्गुरु मे प्रसादम् ॥ ३३

अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम ॥ ३४

न विद्यन्तेऽन्तरं व्यवधानं यस्य त**दनंतरं उदीरित**मुक्तं **लक्ष्म** लक्षणम् । भजत इति यस्याः पादौ ता**वनंतरोदीरितभाजौ** इन्द्रवज्रोपेन्द्रवज्रयोरित्यर्थः । **इत्थम**मुना प्रकारे**णान्यास्वपि** उक्ताप्रभृतिषु जातिषु **मिश्रितास्विदमेवो**पजातिं **नाम स्मरन्ति** वदन्ति छंदोविदः । यथा ।
विहाय पंकेरुहकाननानि स्फारस्फुरत्केतकमभ्युपास्य ।
मेघागमेऽस्मिन्नुपजातिसर्वे भ्रमन्त्यमी षट्चरणा रणंतः ॥
एवमन्यान्यप्युदाहरणानि कुमारसम्भवादिमहाकाव्येषु द्रष्टव्यानि ।

समवृत्ताध्यायेऽपि प्रसंगादुपजातीनां पाठा लाघवार्थः । एषां प्रस्तारवशाच्चतुर्दशप्रकारा भवन्ति । ते च लेखकेन पूर्वपत्रे रचिताः । अत्र प्रथमगणकृत एव विशेषः । जत एव प्रस्तार्यन्तो । यथा ।

।ऽ।	ऽऽ।	।ऽ।	ऽऽ।	।ऽ।	ऽऽ।	।ऽ।	ऽऽ।	।ऽ।	ऽऽ।	।ऽ।	ऽऽ।	।ऽ।	ऽऽ।
ऽऽ।	।ऽ।	।ऽ।	ऽऽ।	ऽऽ।	।ऽ।	।ऽ।	ऽऽ।	ऽऽ।	।ऽ।	।ऽ।	ऽऽ।	ऽऽ।	।ऽ।

146 पाठे तावियोग ।

147 पाठे विजितामरारेस ।

ऽऽ।	ऽऽ।	ऽऽ।	ऽऽ।	।ऽ।	।ऽ।	।ऽ।	ऽऽ।	ऽऽ।	ऽऽ।	।ऽ।	।ऽ।	।ऽ।	।ऽ।
ऽऽ।	ऽऽ।	ऽऽ।	ऽऽ।	ऽऽ।	ऽऽ।	ऽऽ।	।ऽ।	।ऽ।	।ऽ।	।ऽ।	।ऽ।	।ऽ।	।ऽ।

३४

सान्द्रपदं भ्तौ नगगुरुभिश्च । ३५

भगणतगणनगणा द्वौ गुरू तत्र तद्वृत्तं **सान्द्रपदं** नाम । यथा ।[148] ३५

नजजलगैर्गदिता सुमुखी । ३६

नगणजगणजगणा लघुगुरू च यत्र तद्वृत्तं **सुमुखी** नाम । **पंचभिर्यतिरित्याम्नायः** । यथा ।

सुतजननी सुकुलप्रभवा
मृदुवचना सुरते चतुरा ।
भवति गृहे विपुलैः सुकृतैः
मृगनयना युवतिः सुमुखी ॥ ३६

दोधकवृत्तमिदं भभभाद्गौ । ३७

यत्र भगणत्रयं द्वौ गुरू च तद्वृत्तं **दोधकं** नाम । यथा ।
यस्य नरस्य भवेदिह साक्षाद्वृत्तमदोधकयोरपि तुल्यम् ।
तेन समं कथमर्थवतापि प्रेमकथां कथयामि वयस्ये ॥ ३७

शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः । ३८

यत्र मगणतगणतगणा द्वौ गुरू च तद्वृत्तं **शालिनी** नाम । **चतुर्भिः सप्तभिर्यतिरित्याम्नायः** । यथा ।
नो जानीते शालिनी वारायार्यप्रायेणेह स्तादभेदं मनुष्यः ।
सोऽपि प्रेम प्राप्य देवीप्रियायाः धुर्यात्मानं वेत्ति वैदग्धभाजाम् ॥ ३८

वातोर्मीयं गदिता म्भौ तगौ गः । ३९

मगणभगणतगणा गुरुद्वयं यत्र तद्वृत्तं **वातोर्मी** नाम । अत्र वक्ष्यमाणसूत्रे च विशेषानभिधाना**त्प्रागुक्तैव यति**र्यथा ।
बलाद्वातोर्मय एते सनक्राः सामुद्राणां सलिलानां समूहाः ।

---

[148] उदाहरणं नास्ति ।

आब्रह्मादीनपि संहृत्य लोकान् येषामन्तः सुखशायी मुरारिः ॥ ३९

म्भौ न्लौ गः स्याद्भ्रमरविलसितम्[149] । ४०

मगणभगणनगणा लघुगुरू च यत्र तद्वृत्तं **भ्रमरविलसितं** नाम ।
प्राच्येव यतिर्यथा[150] ।
त्यक्त्वा मानं चरणविपतितस्तन्मन्येऽहं[151] प्रिय सखि नियतम् ।
त्वद्वक्त्राब्जभ्रमरविलसितं कर्तुं वांछत्ययमिह दयितः ॥ ४०

पञ्चरसैश्रीर्भतनगगैः स्यात् । ४१

भगणतगणनगणा द्वौ गुरू च यत्र तद्वृत्तं **श्रीः**[152] नाम । **पंचभिः षड्भिर्यति**र्यथा ।
द्रव्यविमोहाज्जलनिधियानं संगरभूमौ त्यजति च देहम् ।
कृत्यमकृत्यं गणयति नैव श्रीरसलुब्धो ध्रुवमिह जन्तुः ॥ ४१
कुड्मलदंतीत्येके ।

रो नराविह रथोद्धता लगौ । ४२

यत्र रगणनगणरगणा लघुगुरू च तद्वृत्तं **रथोद्धता** नाम । यथा ।
लग्न एव पदयोरथोद्धतान्यायताक्षिवचनानि संवृणु ।
सत्रवाभिरिति[153] या प्रबोधिता तां स्मरामि निजजीवितौषधिम् ॥ ४२

स्वागतेति रनभाद्गुरुयुग्मम् । ४३

यस्य पादे रगणनगणभगणा गुरू च तद्वृत्तं **स्वागता** नाम । यथा ।
सर्वलोकसुखदास्वपि वर्षास्वागतासु न सुखी रिपुवर्गः ।
विन्ध्यवर्मनृपते तव खड्गभ्रान्तिभाजमचिरामभिवीक्ष्य ॥ ४३

ननसगगुरुरचिता वृन्ता । ४४

---

[149] पाठे भ्रमरविरचितम् ।
[150] पाठे यति यथा ।
[151] पाठे चरणतिपतितस्तन्मन्येऽहं ।
[152] पाठे श्री नाम ।
[153] अस्पष्टमेव ।

द्वौ नगणौ सगणो गुरुद्वयं यस्य पादे तद्वृत्तं **वृन्ता** नाम । अत्र मण्डूकप्लुतन्यायेन शालिन्युक्तेति सूत्रा**दब्धिलोकैरिति पदमनुवर्तते** । तेन हि[154] चतुर्भिर्यतिः । यथा ।
मधुकरचरणभराक्रान्तं पथ तदिह कुसुममिदं वृन्तात् ।
कथयति विषयवियुक्तानां विधिपरिणतिमिव लोकानाम् ॥ ४४

ननरलगुरुभिश्च भद्रिका । ४५

द्वौ नगणौ रगणो लघुगुरू च यत्र तद्वृत्तं **भद्रिका** नाम । यथा ।
विविधपरकथाप्रगल्भवागतिविरलविसंस्थुलद्विजा ।
कपिलचिकुरसंचया कृशा न भवति वनिता प्रभद्रिका ॥ ४५

श्येनिका रजौ रलौ गुरुर्यदा । ४६

रगनजगणरगणा लघुगुरू च यत्र तद्वृत्तं **श्येनिका** नाम । यथा ।
श्येनिकाशृगालसंकुले रणे विंध्यवर्मदेव ये त्वया हताः ।
शत्रवस्त एव तारकाश्रयं तन्वते विमानगाः सुरावृताः ॥ ४६

उपस्थितमिदं ज्सौ ताद्गकारौ । ४७

जगणसगणतगणा द्वौ गुरू च यत्र तद्वृत्तं **उपस्थितं** नाम । यथा ।
उपस्थितमनेकाश्चेतकी चुलुक्यनृपतेः सैन्यं विशालम् ।
अवन्तिप्रिय निहित्वा न कोऽपि ध्रुवं क्षितितले जेतुं समर्थः ॥ ४७

शिखण्डितमिदं ज्सौ त्गौ गुरुश्चेत् । ४८

जगणसगणौ तगणगुरू **गुरुश्चेत**द्वृत्तं **शिखण्डितं** नाम । यथा ।[155] ४८

मौक्तिकमाला भवेद्भभ्तलगाः । ४९

भगणभगणतगणलघुगुरवो यत्र भवेत्तद्वृत्तं **मौक्तिकमाला** नाम । यथा ।[156] ४९

जगत्याम् ।

---

[154] पाठे ह ।

[155] उदाहरणं नास्ति ।

[156] उदाहरणं नास्ति ।

चन्द्रवर्त्म गदितं तु रनभसैः । ५०

यत्र रगणनगणभगणसगणा भवन्ति तद्वृत्तं **चन्द्रवर्त्म** गदितम् । यथा ।
चक्षुषी परिविमृश्य करयुगात् क्रान्तहर्यपरिशोभितवदना ।
चन्द्रवर्त्म कथयेत्यतिविवशा कांतमेवमवदन्निशि वनिता ॥ ५०

जतौ तु वंशस्थमुदीरितं जरौ । ५१

यत्र जगणतगणजगणरगणास्तद्वृत्तं **वंशस्थं** नाम । यथा ।
स्ववेश्मवंशस्थमुदीक्ष्य वायसं प्रियागमासंशिनमुत्तमेंगितैः[157] ।
जगाद काचिन्मुदिता समागते प्रिये प्रदास्यामि तवेप्सितं खग ॥ ५१

स्यादिन्द्रवंशा ततजैः रसंयुतैः । ५२

यत्र द्वौ तगणौ जगणरगणौ[158] तद्वृत्तं **इन्द्रवंशा** नाम यथा ।
आदीन्द्रवंशाद्दिवमस्तभूरुहप्रच्छादितानेकगुहा गृहोऽपि सन् ।
धाराधिनाथस्य भयेन विद्रुतान् भूगोप्तुरिष्टान्न भवामि नेश्वरः ॥ ५२

इह तोटकमम्बुधिसैः प्रथितम् । ५३

यत्र चत्वारि सगणास्तद्वृत्तं **तोटकं** नाम । यथा ।
त्यज मानममानमनंतगुणं कुरु वाक्यमिदं परिणामहितम् ।
त्वयि[159] तोटकजायतनेत्रयुगे त्वरितं दयितांतिकमिन्दुमुखि ॥ ५३

द्रुतविलम्बितमाह नभौ भरौ । ५४

नगणभगणौ भगणरगणौ यत्र तद्वृत्तं **द्रुतविलम्बितं** नाम । यथा ।
द्रुतविलम्बितगेन तवारिणा क्वचिदपि स्थिरभावमविन्दता ।
गुरुनितम्बभरालसगामिनी प्रतिपदं स्ववधूर्नृप निन्द्यते[160] ॥ ५४

---

[157] पाठे प्रियागमासंशिनमुत्तमेंगतैः ।

[158] पाठे जगणरगणा ।

[159] पाठे त्वमि ।

[160] पाठे स्ववधूर्नृपतिर्निन्द्यते ।

वसुयुगविरतिर्नौ म्यौ पुटोऽयम् । ५५

द्वौ नगणौ मगणयगणौ यत्र तद्वृत्तं **पुटो** नाम । **वसु**भिरष्टभि**र्युगै**श्चतुर्भिर्यतिः ।
अपि चरणनतोऽहं तत्प्रसीद त्यज सरसिजनेत्रे मौनमुद्राम् ।
वचनममृतकल्पं श्रोतुकामा श्रवणपुटनिपेयं सर्वदा ते ॥ ५५

प्रमुदितवदना भवेन्नौ ररौ । ५६

द्वौ नगणौ द्वौ रगणौ यत्र तद्वृत्तं **प्रमुदितवदना** नाम । यथा ।
गुरुकुचयुगलां विशंलक्षणां विकटकटितटां मनोज्ञां सदा ।
विविधसुरतिकेलिदक्षामहं प्रमुदितवदनां स्मरामि प्रियाम् ॥ ५६

चतुर्जगणं वद मौक्तिकदाम । ५७[161]

नयसहितौ न्यौ कुसुमविचित्रा । ५८

नगणयगणौ पुनर्नगणयगणौ यत्र तद्वृत्तं **कुसुमविचित्रा** नाम । **षड्भिर्यतिरित्युपदेशः** ।
यथा ।
परिहृतरोषा कृतबहुवेषा सह निजभर्ता तरुणि वसंते ।
प्रमुदितपुंस्कोकिल इव रम्यां व्रज वनराजिं कुसुमविचित्राम् ॥ ५८

रसैर्जसजसा जलोद्धतगतिः । ५९

यत्र जगणसगणजगणा सगणश्च तद्वृत्तं **जलोद्धतगति**र्नाम । यथा ।
अतीत्य सरितो जलोद्धतगतीरनेकगहना कुलानपि गिरीन् ।
समुद्रतरमाश्रिता रिपुनृपाः सुखं न निशि शेरते तव भयात् ॥ ५९

भुजंगप्रयातं भवेद्यैश्चतुर्भिः । ६०

चत्वारो यगणा यत्र तद्वृत्तं **भुजंगप्रयातं** नाम । यथा ।
विदग्धांगनालोचनानन्दकारी सखि स्वेच्छया वीक्षितुं प्राणनाथः ।
मया नैव लब्धो हत ग्राममार्गे भुजंगप्रयातानुकारिण्यमुष्णिग् (?)॥ ६०

रैश्चतुर्भिर्युता स्रग्विणी संमता । ६१

---

[161] पाठे अस्य श्लोकस्य टीका नास्ति ।

चत्वारो रगणा यस्य पादे तद्वृत्तं **स्रग्विणी** नाम । यथा ।
पद्मपत्रायताक्षी शशांकानना कुंकुमोद्वर्तितांगी घनोच्चस्तनी ।
अंगहारैरनेकप्रकारैर्युता नृत्यति स्त्री सखे स्रग्विणी सुंदरा ॥ ६१

भुवि भवेन्नभजरैः प्रियंवदा । ६२

नगणभगणजगणरगणा यत्र तद्वृत्तं **प्रियंवदा** नाम । यथा ।
गुरुपयोधरवती सुमध्यमा विपुलपुण्यनिचयैः स्ववेश्मनि ।
भवति पार्वणशशांकसुंदराननवती प्रियतमा प्रियंवदा ॥ ६२

त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः । ६३

तगणयगणतगणयगणा यत्र तद्वृत्तं **मणिमाला** नाम । षड्भिर्यतिः । यथा ।
मातः सुरसिन्धो त्रैलोक्यपवित्रे पश्यामि कदा ते पापापहमम्भः ।
चंचन्मणिमालालंकारमणीनां त्यक्त्वा वनितानां संगं विषतुल्यम् ॥ ६३

धीरैरभाणि ललिता तभौ जरौ । ६४

यत्र तगणभगणजगणरगणास्तद्वृत्तं **ललिता** नाम । यथा ।
पीनोन्नतस्तनभरोपरिस्फुरद्धारावलीसुभगमायतेक्षणा ।
नृत्यत्यसौ सुललितं हि नूपुराध्वानप्रबोधितमनोभवा वधूः[162] ॥ ६४

प्रमिताक्षरा सजससैरुदिता । ६५

सगणजगणौ सगणौ यत्र तद्वृत्तं **प्रमिताक्षरा** नाम । यथा ।
चरणानतिं गतवति प्रसभं दयिते नितांतसुभगे सुभगे ।
परुषाणि संत्यज वचांसि सखि प्रमिताक्षरा भव शशांकमुखि ॥ ६५

ननभरसहिताऽभिहितोज्ज्वला । ६६

द्वौ नगणौ भगणरगणौ च यत्र तद्वृत्तं **उज्ज्वला** नाम । यथा ।
इह शरदि भवन्त्युकाशया (?) विमलतरशशांककरोज्ज्वला ।
विदधति गमनं विजयार्थिनः प्रतिदिवसमवनीपतयः स्वयम् ॥ ६६

---

[162] पाठे वधूम् ।

पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ । ६७

द्वौ मगणौ द्वौ यगणौ च यत्र तद्वृत्तं **वैश्वदेवी** नाम । पञ्चभिः सप्तभिर्यतिः । यथा ।
वश्यात्मा नित्यस्नानशीलो महात्मा मित्रे शत्रौ वा तुल्यचित्तप्रवृत्तिः ।
श्रद्धासंपन्नो वैश्वदेवी च लोके स स्वर्गस्त्रीणां वल्लभः स्यात्सदैव ॥ ६७

अब्ध्यंगैः स्याज्जलधरमाला म्भौ स्मौ । ६८

मगणभगणसगणमगणा यत्र तद्वृत्तं **जलधरमाला** नाम । चतुर्भिरष्टभिश्च यतिः । यथा ।
सत्याकाशे जलधरमालाव्याप्ते नीपामोदे प्रसरति झंझावाते ।
वर्षाकाले मुदितमयूरव्राते त्यक्त्वा कान्तां व्रजसि कथं पाथ त्वम् ॥ ६८

इह नवमालिनी नजपरौ भ्यौ । ६९

नगणजगणभगणयगणा यत्र तद्वृत्तं **नवमालिनी** नाम । इहेत्यवग्रहणादब्ध्यंगैरिति[163]
पदविरीततया विपरिणमति तेनाष्टभिः चतुर्भिर्यथा ।
तव निशितासिघातदलिता रिद्धिपदकुम्भमौक्तिकसमूहैः ।
कृतनवमालिनीव भजति त्वां प्रति स्मरं नरेन्द्र जयलक्ष्मीः ॥ ६९

स्वरशरविरतिर्नौ रौ प्रभा नाम । ७०[164]

भवति नजावथ मालती जरौ । ७१

नगणजगणौ जगणरगणौ यत्र तद्वृत्तं **मालती**[165] नाम । यथा ।
भ्रमरयुवा भ्रमतीह मालतीतरुतलमप्यपहाय केतकीम् ।
युवतिजनेन गृहीत नाम कः कथमपि न प्रतिबोधमेत्यसौ ॥ ७१
वरतनुरित्येके ।

जरौ जरौ वदन्ति पञ्चचामरम् । ७२

इति वद तामरसं नजजाद्यः । ७३

नगणजगणौ जगणयगणौ यत्र तद्वृत्तं **तामरस**मिति वद शिक्षमिति शेषः । यथा ।

---

[163] पाठे इहेत्यवग्रहणादब्ध्यंगेरिति ।

[164] उदाहरणं नास्ति ।

[165] पाठे मालाती ।

मृदुतरतामरसारुणपादव्रणतितिविस्रवदस्रजलौघाः[166] ।
विदधति पर्व तिरोधसि यानं करपिहितोच्चक्रु वा रिपुवधः ॥ ७३

अतिजगत्याम् ।

तुरगरसयतिर्नौ ततौ गः क्षमा । ७४

यत्र द्वौ नगणौ द्वौ तगणौ गुरुश्च तद्वृत्तं **क्षमा** नाम । यथा ।
सप्तभिः षड्भिश्च यतिः । यथा ।
चकितमृगदृशा नेक्षितो लीलया त्रिवलितवदनश्रीचयाहं मुहुः ।
न च सुरतटिनी न क्षमा चाश्रिता गतमिदमधुना जीवितं मे वृथा ॥ ७४

म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् । ७५

मगणनगणजगणरगणगुरवो यत्र तद्वृत्तं **प्रहर्षिणी** नाम । त्रिभिर्दशभिर्यतिः । यथा ।
लोलाक्षी विपुलनितम्बबद्धकाञ्ची पीनोच्चस्तनयुगला सुरोमराजिः ।
नृत्यन्ती सुललितमंगहाररम्यं वारस्त्री गमनलसत्प्रहर्षिणीयम् ॥ ७५

पाठान्तरम् ।

चतुर्ग्रहैरिह रुचिरा जभौ स्यौ गः । ७६
चतुर्ग्रहैरिह रुचिरा जभैस्जगाः । ७६[167]

जगणभगणसगणजगणा गुरुश्च यत्र तद्वृत्तं **रुचिरा** नाम । यथा ।
समीहते य इह परापदापदं वियच्छरित्तटरुचिरोटजालयः ।
मृगीदृशो वदनसरोजदर्शनं न तस्य तत्प्रमदकरं कवत् ॥ ७६

वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम् । ७७

यत्र मगणतगणयगणसगणगुरवस्तद्वृत्तं **मत्तमयूरम्** । चतुर्भिर्नवभिर्यतिः । यथा ।
चञ्चं चूतं पुष्पितकं[168] केल्लितरूभिः क्रीडत्क्रोडं संचरदुन्मत्तमृगोधम् ।
स्निग्धच्छायं वारिततापं तरुखण्डैः माद्यद्भृंगं मत्तमयूरं वनमेतत् ॥ ७७

---

[166] पाठे मृदुतरतामरसारुणपादव्रणतितिविस्रवदमस्रजलौघाः ।
[167] This seems to be the preferred reading by the commentator. He has not given example of the former reading.
[168] पाठे पुष्पितंकं ।

पाठान्तरम् ।

नजसजगैर्भवति मञ्जुभाषिणी । ७८

सजसा जगौ भवति मञ्जुभाषिणी । ७८[169]

यस्य पादे सगणजगणसगणजगणा गुरुश्च तद्वृत्तं मञ्जुभाषिणी नाम । यथा ।
स्मर सुंदराकृतिमनेकवल्लभं चरणप्रणामनतमीप्सितं पतिम् ।
परुषोक्तिभिः किमिति खेदयस्यमु सखि वल्लभा भवति मञ्जुभाषिणी ॥ ७८

इह नंदिनी सजससैर्गुरुयुक्तैः । ७९[170]

सश्च जश्च सश्च सश्च तैः सगुरुभिर्नन्दिनी । ७९

ननतरगुरुभिश्चन्द्रिका चतुर्भिः । ८०

द्वौ नगणौ तगणरगणौ गुरुश्च यत्र तद्वृत्तं **चन्द्रिका** नाम । चतुर्भिर्यतिर्यथा ।
वितरति कुमुदानां श्रियं समग्रां तम इव वनितानां[171] भिनत्ति मानम् ।
ततमपि भुवनं चन्द्रिका भुवस्थाधवलितमिव चक्रे शरन्निशासु ॥
अष्टभिर्यतिरित्येके ।८०

शक्वर्याम्

म्तौ न्सौ गावक्षग्रहविरतिरसंबाधा । ८१

मगणतगणनगणसगणा द्वौ गुरू च यत्र तद्वृत्तं **असंबाधा** नाम । **अक्षै**रिन्द्रियैः पञ्चभि**र्ग्रहै**र्नवभिश्च यतिः । यथा ।
यावद्गच्छेयं दयितविहितसंकेतस्थानस्याभ्यां सङ्कृतनिवृततुलाकोटिः ।
तावच्चक्रेऽग्रे द्रुतमुदयमयं वैरी भित्वा संबंधान्यपि सखि तिमिराणीन्दुः ॥ ८१

ननरसलघुगैः स्वरैरपराजिता । ८२

द्वौ नगणौ रगणसगणलघुगुरवो यत्र तद्वृत्तं **अपराजिता** नाम ।

---

[169] This seems to be the preferred reading by the commentator.
[170] टीकायामुदाहरणं नास्ति ।
[171] पाठे तमइववतिनानां ।

सप्तभिर्यतिः । यथा ।
तुरगरजवतीं तुलार्कमहीपतेरितरनृपशतैश्चमूमपराजिताम् ।
जयति विजयिदोर्युगैकसहायवानवनिपतिरसौ प्रमारकुलोद्भवः ॥ ८२

ननभनलगिति प्रहरणकलिका । ८३

नगणौ भगणनगणलघुगुरवश्च यत्र तद्वृत्तं **प्रहरणकलिका** नाम । **इति शब्दस्याव्ययस्य ग्रहणात्सैव यतिः** । यथा ।
रणभुवि भवता प्रहरणकलिता परहृतवनितास्तव[172] नृप रिपवः ।
विदधति शयनं कृततृणशयना वनभुवि सततं भयचकितहृदः ॥ ८३

उक्ता वसंततिलका तभजा जगौ गः । ८४(१)

तगणभगणौ द्वौ जगणौ द्वौ गुरू च यस्य पादे तद्वृत्तं **वसंततिलका** नाम । यथा ।
भ्रातर्वसंततिलकानतिमुक्तकं च संदश्यतेऽत्र किमु मत्परमस्त्वमेतत् ।
नाऽहं स योऽभवदनेकविधोत्सवश्रीः[173] संप्रत्यसत्यविरहैकगृहं[174] प्रियायाः ॥

सिंहोद्धतेयमुदिता मुनिकाश्यपेन ।८४(२)

इयमेव वसंततिलका **कश्यप**स्याचार्यस्य[175] मतेन **सिंहोद्धता** नाम । यथा ।
उन्निद्रपद्मवदनः सुभगोऽङ्गनानामारक्तपादतलपाणीरदीनसत्त्वः ।
सिंहोद्धता समगलः सुविशालवक्षाः स्यादीदृशो नरपतिः पुरुषः पृथिव्याः ॥

उद्धर्षिणी निगदिता मुनिसैतवेन । ८४(३)

सैव वसंततिलका **सैतव**मुनिना **उद्धर्षिणी निगदिता** उक्ता । यथा ।
संवत्सरे रसपयोनिधिसूर्यसंख्यैः श्रीविक्रमान्नरपते रचिता[176] ममेयम् ।
उक्ता सनामभिरुदाहरण्यैरुदारैरुद्धर्षिणी भवतु चेतसि सत्कवीनाम् ॥

गोमेन सैवमुदिता मधुमाधवीति ।८४(४)

---

[172] पाठे परमहृतवनितास्तव ।
[173] पाठे नाहंसयोभवदनेकविधोत्सवश्रीः ।
[174] पाठे संप्रत्यसत्यविरहैःकगृहं ।
[175] पाठे कस्यपस्याचार्यस्य ।
[176] पाठे रसपयोनिधिसूर्यसंख्यैश्रीविक्रमान्नरपतेरचिता ।

वसंततिलकामित्येके[177] । ८४

इन्दुवदना भजसनैः सगुरुयुग्मैः । ८५

भगणजगणसगणनगणा द्वौ गुरू च यस्य पादे तद्वृत्त**मिन्दुवदना** नाम । यथा ।
मारुतवशप्रचलितोत्पलदलाक्षं शोभनललाटतटमध्यकृतपुण्ड्रम् ।
रे पथिक संप्रति मधौ मदनबन्धौ संस्मरसि तद्वदनमिन्दुवदनायाः ॥ ८५

द्विःसप्तच्छिदलोला म्सौ म्भौ गौ चरणे चेत् । ८६

यस्य चरणे पादे मगणसगणमगणभगणा द्वौ गुरू तद्वृत्तं **अलोला** नाम । **सप्त**भिर्यतिः । यथा ।
यो देव द्विजभक्तः संसारेषु विरक्तः श्रौतस्मार्तविधीनां कर्ता त्यक्तविकल्पः ।
मैत्रः कारुणिकात्मा क्रोधामर्षविमुक्तस्तस्य श्रीभुवने स्याल्लोला नूनमलोला ॥ ८६

अतिशक्वर्याम् ।

द्विहतहयलघुरथ गिति शशिकला[178] । ८७

द्विहतहयलघुरित्यर्थः गुरुश्च भवति यस्य चरणे तद्वृत्तं **शशिकला** नाम । सप्तभिरष्टभिर्यतिः । पारिशेष्याद्यथा ।
कुसुमशरतनुदहनशिरसि जटामुकुटतटमणिरमलकिरणा[179] ।
तव भवतु सुखकृदयमिह[180] सततं प्रविपदि सुनभसि वसति[181] शशिकला ॥ ८७

स्रगिति भवति रसनवकयतिरियम् । ८८

षड्भिर्नवभिश्च यदा **यति**र्भवति तदा **स्रगि**ति नाम । **माले**ति वक्तव्ये छंदोभंगभयात् स्रगित्युक्तम् । एकार्थत्वान्न दोषः । यथा ।
घनपरिमलमिलितमधुपनिचया स्रगियमुरसि तव शशिमुखि शुशुभे ।

---

177 पाठे वसंततिलकामित्यने ।

178 पाठे शशिकाला ।

179 पाठे जटामुकुटातटमणिरमलकिरणा ।

180 पाठे सुखकृतयमिह ।

181 पाठे वशति ।

कटकयुगलमपि कलरवसुभगं श्रियमिदमिह जनयति सुचरणया[182] ॥ ८८

वसुहययतिरिति मणिगुणनिकरः । ८९

इयमेव शशिकला **वस्वष्टभिर्हयैः** सप्तभिर्यदा **मणिगुणनिकरः** नाम । यथा ।
परजनहितकरवरधनकलितः सुवचनकृतवरजनसुखनिवहः ।
भवभुवि भवकृतवरतरमहिमा स भवति नरवर मणिगुणनिकरः ॥ ८९

ननमयययुतेयं मालिनी भोगिलोकैः । ९०

द्वौ नगणौ मगणो द्वौ यगणौ यस्य तद्वृत्तं **मालिनी** नाम । यथा । अष्टभिः सप्तभिर्यतिः ।
नवजलधरमालामालिनीं तां विलोक्य
निजदयितवियोगप्रान्तभावं निबोधम् ।
न न खलु जलधराणां नादमाकर्ण्य कश्चि-
द्भवति शिथिलबुद्धिर्वेश्म गन्तुं प्रवासी ॥ ९०

भवति नजौ भजौ रसहितौ प्रभद्रकम् । ९१

यस्य पादे नगणजगणभगणजगणरगणास्तद्वृत्तं **प्रभद्रकं** नाम । यथा ।
अलभत दुश्चरेण तपसा हिमाद्रिजा
यमिह पतिं पतिं[183] त्रिजगतां महेश्वरम् ।
पवनसमुद्धुतामलिशिखाहुतस्मरो
दिशतु सतां सदैव सवि सुप्रभद्रकम् ॥ ९१

सजना नयौ[184] शरदशकविरतिरेला । ९२

सगणजगणनगणनगणयगणा यत्र तद्वृत्त**मेला** नाम । पंचभिर्दशभिर्यतिः । यथा ।
वरचंदनद्रुमकिशलयमरिचैला-
लवलीलताप्रभृतिवनमिह धुन्वन् ।
मलयानिलः सपदि विदलितप्रयुक्त-
प्रमदाजनः प्रसरितपतिबन्धुः ॥[185] ९२

---

[182] पाठे सुचरणयाः ।

[183] पाठे पत्तिं ।

[184] पाठे नजौ । टीकायां तु नयौ इति गृहीत्वा विवृतम् ।

[185] चरमे पादे छंदोभंगः लक्ष्यते ।

म्रौ म्यौ यान्तौ भवेतां सप्ताष्टभिश्चन्द्रलेखा । ९३

यस्य पादे मगणरगणमगणा द्वौ यगणौ तद्वृत्तं **चन्द्रलेखा** नाम । सप्तभिरष्टभिर्यतिः । यथा ।
विभ्रान्तिश्चन्द्रलेखां चूडामणिस्थानभृत्तां
यस्तार्तीयं च नेत्रं जाज्वल्यमानं ललाटे ।
कण्ठे यस्यास्थिमाला भस्मांगरागः शरीरे
कल्पांतां वः स दश्यात्त्रैलोक्यनाथो गिरीशः ॥ ९३

अष्टौ

भ्रत्रिनगैः रसात्खमृषभजगविलसितम् । ९४

भगणरगणौ त्रयो नगणा गुरुश्च यत्र तद्वृत्तं **ऋषभगजविलसितं** नाम । षट्दशभिर्यतिः ।
यत्र चतुष्पथेषु विविधयुवतिजनता
साममनोरमेषु तव रिपुवरनगरे[186] ।
त्वद्भुजविक्रमेण नृपतिवर विजयति
संप्रति तत्र वन्यमृषभगजविलसितम् ॥ ९४

नजभजरैः सदा भवति वाणिनी गयुक्तैः । ९५

नगणजगणभगणजगणरगणा गुरवो यत्र तद्वृत्तं **वाणिनी** नाम । यथा ।
चकितमृगेक्षणा गुरुनितम्बबद्धकाञ्ची
गुणकलकिंकिणीरवविबोधासमेषुः ।
जनयति वाणिनी चतुरवाक्यपण्डितेयं
मुदमधिकां सखे मनसि करोति दृष्टा[187] ॥ ९५

अत्यष्टौ

---

[186] पाठे तवरिवरनगरे ।
[187] पाठे दृष्टा / हृष्टा (?) ।

रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी । ९६

यगणमगणनगणसगणभगणा लघुगुरू च यत्र तद्वृत्तं **शिखरिणी** नाम ।
षड्भिरेकादशभिर्यतिः ।
शशांकास्या चंचत्कुवलयदलस्पर्धिनयना
सलीलं गच्छंती गुरुजघनभारालसगतिः ।
इयं पीनोत्तुंगस्तनशिखरिणी वारवनिता
कटाक्षैर्विक्षोभं जनयति मुनीनामपि हृदि ॥ ९६

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः । ९७

जगणसगणजगणसगणयगणलघुगुरवो यत्र तद्वृत्तं **पृथ्वी** नाम । यथा ।
किमित्ययमसंस्कृतस्तव सुकेशि केशोच्चयः
किमित्युत सुमेखलाविरहिता च पृथ्वी कटिः ।
तदेहि कुरु मण्डनं त्यज रुषं वसंतोत्सवे
यतः सुतनु पञ्चषैरपि दिनैर्वयो यास्यति ॥ ९७

दिङ्मुनि वंशपत्रपतितं भरनभनलगैः । ९८

भगणरगणनगणभगणनगणलघुगुरवो यत्र तद्वृत्तं **वंशपत्रपतितं** नाम । दशभिः सप्तभिर्यतिः । यथा ।
नैव विदुस्तृषातुरधियस्तव रिपुनगरे
मंदिरदीर्घिकासु सलिलं सविधमपि मृगाः ।
अम्बुजवंशपत्रपतितद्रुमदलनिकरैः
छादितमातपे तु महति क्षितिपति तलका (?) ॥ ९८

रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा । ९९

नगणसगणौ मगणरगणौ सगणलघुगुरवो यत्र तद्वृत्तं **हरिणी** नाम । षड्भिः चतुर्भिर्यतिः । यथा ।
वदनममलं धत्ते शोभां शशांकसमाश्रितां
श्रवणयुगलं दोलालीलां तनोति मनोभुवः ।
स्तनपरिसरे हारः स्फारः स्फुरत्यतिनिर्मलः

किमिह न चेत्तस्याहारि[188] ध्रुवं हरिणीदृशः ॥
ऋषभचरितमित्येके । ९९

मन्दाक्रान्ता जलधिषडगैः म्भौ नतौ ताद्गुरू चेत् । १००

मगणभगणनगणा द्वौ तगणौ द्वौ गुरू च यस्य पादे तद्वृत्तं **मन्दाक्रान्ता** नाम । चतुर्भिः षड्भिश्चेद्यतिर्भवति । यथा ।
मन्दाक्रान्ताधरकिसलया पाणिपद्मं धुनाना
गाढाश्लेषप्रणयिशिथिला वेपमानांगयष्टिः ।
स्विद्यद्वक्त्रा पुलकिततनुः किंचिदामीलिताक्षी
चेतःप्रीतिं जनयति भृशं नूतनोढा विवोढा ॥ १००

यदि भवतो नजौ भजजला गुरुर्नर्कुटकम् । १०१

नगनजगणभगणा द्वौ जगणौ लघुगुरू अह तद्वृत्तं **नर्कुटकं** नाम । **अवितथमि**ति अन्ये । यथा ।
सुरभिसमागमे विरहिणीजनशोककरे
कृतबहुमण्डना त्वमतिभामनि मद्वचनैः ।
निजदयितांतिकं यदि न यासि गतं तदहो
अवितथवाक्यकौशलमिदं[189] मम निष्फलताम्[190] ॥ १०१

मुनिगुहकार्णवैः कृतयतिं वद कोकिलकम् । १०२

नर्कुटकमेव सप्तभिः **गुहकैः**[191] कार्तिकेयशिरोभिः षड्भिश्चतुर्भिः कृतयतिं तद्वृत्तं **वद कोकिलकं** हे शिष्येति विशेषः । यथा ।
मदनमहोत्सवे मुदितकोकिलकान्तरवे
न भजति या प्रियं प्रणयसुन्दरमिन्दुमुखि ।
ध्रुवमिह साबला स्वयमहर्निशमेव भृशं
सखि परितप्यते गुरुमनोभवतापवती ॥ १०२

धृतौ

---

[188] पाठे किमिहनवेतस्याहारि । छंदोभंगः दृश्यते ।
[189] पाठे अवतथवाक्यकौशलमिदं ।
[190] पाठे निःफलताम् ।
[191] पाठे गुहैकेः ।

स्याद्बाणर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ । १०३

मगणतगणौ नगणस्त्रयो यगणा यत्र तद्वृत्तं **कुसुमितलतावेल्लिता** नाम । पंचभिः षड्भिः सप्तभिर्यतिः । यथा ।
उद्यानाब्जानां प्रकरधुननावाससौरभ्यसंपत् [192]
कंकोलैलानां कुसुमितलतावेल्लितान्यः पुनानः ।
आगस्त्यो वायुर्दिवि[193] सुरतायासयातांगनानां
स्वेदाम्भोबिन्दून्हरति पुनरप्यादिशन्संगमेच्छाम्[194] ॥ १०३

अतिधृत्याम्

रसर्त्वश्वैर्य्मौ न्सौ ररगुरुयुता मेघविस्फूर्जितं स्यात् । १०४

यगणमगणनगणसगणा द्वौ रगणौ गुरुश्च यस्य पादे तद्वृत्तं **मेघविस्फूर्जितं**[195] नाम । षड्भिः षड्भिः सप्तभिर्यतिः । यथा ।
समायातः स्वैरं कुटजकुसुमामोदवाही समीरः
श्रुतं धैर्यं ध्वंसि प्रसभमधुना मेघविस्फूर्जितं च ।
वियोगे सद्भर्तुः निजलवणिमाऽधःकृतस्वंतिजस्य[196]
प्रयान्ती मे प्राणा कुलिशकठिना मेघनाशं तथापि ॥ १०४

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् । १०५

मगणसगणजगणसगणा द्वौ तगणौ गुरुर्यस्य पादे तद्वृत्तं **शार्दूलविक्रीडितं** नाम । द्वादशभिः सप्तभिर्यतिः । यथा ।
श्रीखण्डाचलकंदरात्सरभसं निर्गत्य सांद्रं द्रुमां-
श्चंचच्चम्पकचारुकेसरभरं धन्वन्मुहुर्लीलया ।
इत्थं विभ्रदयं वसन्तपवनः शार्दूलविक्रीडितम्
स्त्रीणां मानगजं हनिष्यति हठात् मानोत्कटानामपि ॥ १०५

---

[192] पाठे प्रकरधुननावससौरभ्यसंपत् ।
[193] पाठे वायुर्विवि ।
[194] पाठे पुनरप्यादिशन्संगमेच्छं ।
[195] पाठे मेघविस्फुर्जिता ।
[196] पाठे अस्पष्टम् ।

[कृतौ][197]

ज्ञेया सप्ताश्वषड्भिर्मरभनययुतो भ्लौ गः सुवदना । १०६

यस्य[198] वृत्तस्य पादे मगणरगणभगणनगणयगणभगणलघुगुरुस्तद्वृत्तं **सुवदना** नाम । सप्तभिः सप्तभिः षष्ठश्च यतिः ।
रम्भास्तम्भोपमोरुः सुगुरुघनकुचा सारंगनयना
मध्यक्षामा सुरोमावलिरमलमदंता चन्द्रवदना ।
हृत्स्थं भावं कटाक्षैर्निजमिव कथयत्येषा सुवदना
यूनां चेतांसि सद्यो मदयति युवतिश्छेकोक्तिकुशला ॥ १०६

त्री रजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्त नाम । १०७

त्रीन्वारान्रगणजगणौ गुरुलघू यस्य पादे तद्वृत्तं **वृत्त नाम** वृत्ताभिधानमित्यर्थः ।
संपदाप्तिसम्भवो मदः कदाचिदेव मानसे नगस्य
न प्रमाणविद्यया परप्रमेयजालभंगदक्षयाऽपि ।
नाप्यरूपरूपया परांगनाभिमर्शनो रसः[199] कदापि
तस्य वृत्तमीदृशं शिरोभिरुह्यते नरैरतो विचार्यः ॥ १०७

प्रकृतौ

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् । १०८

मगणरगणभगणनगणा यगणत्रयं यस्य पादे तद्वृत्तं **स्रग्धरा** नाम । वारत्रयं सप्तभिर्यतिः ।
यासामुन्निद्रपद्मद्युतिमुखममलं स्फारविस्फारिताक्षम्
चञ्चत्काञ्चीगुणेन स्फुरदुरुमणिनाऽऽवर्तलक्ष्मीं वितन्वत् ।
चेतःप्रीतिं नराणां विदधति विलसन्नाभिमध्यप्रदेशा
गच्छन्त्यो राजमार्गे विकचविचकिलस्रग्धरा राजवध्वः ॥ १०८

---

[197] पाठे नास्ति ।
[198] पाठे यस्या ।
[199] पाठे रासः ।

आकृतौ

भ्रौ नरना रनावथ गुरुर्दिगर्कविरमं हि मद्रकमिदम् । १०९

भगणरगणनगणा रगणनगणरगणनगणगुरवो यस्य पादे तद्वृत्तं **मद्रकं** नाम । दशभिर्द्वादशभिर्यतिः । यथा ।

त्वत्कथितैरलीकवचनैः करोमि कथमस्य कोपमसमम्
यस्य न विप्रियं सखि मया श्रुतं न च निरीक्षितं कथमपि ।
मद्रकैरयं प्रियतमः करोति वचनैर्मनः समदनम्
पाश्यविमुक्तजालमधुना ममाङ्घ्रियुगले लुठत्यपि भृशम् ॥ १०९

विकृतौ

यदिह नजौ भजौ भ्जभलगास्तदाश्वललितं हरार्कयतिमत्[200] । ११०

यस्य पादे नगणजगणौ भगणजगणभगणजगणभगणलघुगुरवो भवन्ति तद्वृत्तं **अश्वललितं** नाम । एकादशभिर्द्वादशभिर्यतिः । यथा ।

समरविनिर्जितारिनिवहक्षितीश्वरविचित्रमश्वललितम्
हृदयचमत्कृतिप्रदमिदं विलोक्य भवतो वदन्ति कवयः ।
ध्रुवमुररीचकार नृपतेर्दिवस्पतिरिमं तुरंगमवरं
बहुतरमन्यथा न वियति क्रथैरिह विवेलतेऽतिबहुलैः (?) ॥ ११०

मत्ताक्रीडं मौ त्नौ नौ न्लौ गिति भवति वसुशरदशयतियुतम् । १११

यस्य पादे द्वौ मगणौ तगणनगणौ द्वौ नगणौ नगणलघुगुरवस्तद्वृत्तं **मत्ताक्रीडं** नाम । अष्टभिः पञ्चभि दशभिश्च यतिः । यथा ।

दृष्ट्वा चान्द्रं बिम्बं रात्रौ करनिकरविनिहिततिमिरनिकरम्
गायन्ति स्म स्वैरं यस्मिन्सुविकसितकुसुमवति मधुसमये ।
पौरा बद्धास्तस्मिन् संप्रत्यवनिपतितिलक तव नगरे
मत्ताक्रीडातिस्वच्छन्दं[201] विगतभयभवभमितमृगनिवहाः[202] ॥ १११

---

[200] पाठे हरार्कयतितत् ।

[201] पाठे मत्ताक्रीडतिस्वच्छन्दं ।

संकृतौ

भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भवति तन्वी । ११२

भगणतगणनगणसगणा द्वौ भगणौ नगणयगणौ यस्य पादे तद्वृत्तं **तन्वी** नाम । पंचभिः सप्तभिरादित्यैश्च यतिः । यथा ।
या मुखपद्मं शशधरसदृशं सुन्दरलोलनयनमतिरम्यम्
सुभ्रु बिभर्ति त्रिभुवनजयिनो वासनिवासमिव मकरकेतोः ।
पीननितम्बा गुरुकुचयुगला वृत्तसुकोमलभुजकरयुग्मा
सा मम चित्ते जनयति युवती हर्षमनल्पमियमिह सुतन्वी ॥ ११२

अतिकृतौ

क्रौञ्चपदा भ्मौ स्भौ ननना न्गी इषुशरवसुमुनिविरतिरिह भवेत् । ११३

भगणमगणसगणभगणाश्चत्वारो नगणा गुरुश्च यस्य पादे तद्वृत्तं **क्रौञ्चपदा** नाम । पञ्चभिरष्टभिः सप्तभिश्च यतिः । यथा ।

क्रौञ्चपदा या रोमशगात्री विकटदशनतनिरतिपरुषतनुः
पिंगलदृष्टिः सूक्ष्मनितम्बा कपिलकचनिचयविषमकुचयुगा ।
या च हसन्ती लोचनवारि प्रकटयति रहसि निजपतिविमुखी
मुञ्च सखे तामिष्टतमं चेच्चिरतरमिह तव चर विषयसुखम् ॥ ११३

उत्कृतौ

वस्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुजंगविजृम्भितम् । ११४

[202] विगतभयभिभवभमितमृगनिवहाः ।

द्वौ मगणौ तगणस्त्रयो नगणा रगणसगणौ लघुगुरू च यस्य पादे तद्वृत्तं **भुजंगविजृम्भितं**[203] नाम । अष्टभिरेकादशभिः सप्तभिर्यतिः । यथा ।
प्रालेयांशुज्योत्स्नाकांतद्युतिशुभमविमलसद्वितानमनोहरे
क्रीडागारे चञ्चच्चिरत्र कुसुमपरिमलमिलदलिव्रजेशुधयोज्ज्वले ।
प्रेमोद्रेका वेश्यावृत्तं कुलयुवतिरपि वितनुते यदा सुरतोत्सवे
प्रेयानप्यानन्देनेव प्रकटयति रहसि न तदा भुजंगविजृम्भितम् ॥ ११४

मो नाः षट् सगगिति यदि नवरसरसशरयतियुतमपवाहाख्यम् । ११५

यस्य पादे मगणो नगणा षट् सगणो द्वौ गुरू च यत्र तद्वृत्त**मपवाहं** नाम । नवभिः षड्भिः षड्भिः पंचभिः यतिः । यथा ।
आत्मानं कलयति तृणमिव सुरगुरुधरणितलसुरगवामर्थो[204]
यो नित्यं विकसितमुखकमलमिह वितरति धनममलमर्थिभ्यः ।
संपत्या समुपहसितधनदविभवनिवहदौरभ्यात् [205]
लोकः पश्यति विगलितबहुविधिमतिमतिकृशतनुमपवाहं तम् ॥ ११५

॥ उक्तादिजातिप्रकरणम् ॥

अत एवं उर्ध्वं शेषजातिप्रकरणं भवति । तच्चात्र नोक्तं ग्रन्थगौरवभयात्केदारेण एवमुक्तादिजातिषु उत्कृत्यवसानासु श्रीप्रभृति अपवाहान्तानि[206] समवृत्तानि पदर्श(?) । '**यत्किंचिद्दृश्यते छन्दः षड्विंशत्यधिकाक्षरम् । शेषजात्यादिकं मुक्त्वा तत्सर्वं दण्डका विदु**'रित्यादिलक्षणान् दण्डकानाह ।

---

[203] पाठे भुजंगविजृम्भितम् ।

[204] पाठे सुरगुरुधरणितलंसुरगवामर्थो ।

[205] किञ्चिदपूर्णमिति मे मतिः । अशुद्धञ्च ।

[206] पाठे अपवाहंतानि ।

यदिह नयुक्तगलं ततः सप्तरेफास्तदा चण्डवृष्टिप्रयातो भवेद्दण्डकः । ११६

इह शास्त्रे **चण्डवृष्टिप्रयातो** नाम **दण्डको भवेत्** । यदा नगणौ द्वौ सप्तरगणाश्च भवन्ति । **शतमाण्डवाभ्यामृषिभ्यामनेकाऽस्य संज्ञा कृता** । यथा ।
कुवलयदलदीर्घनेत्रा सुमध्या पृथुश्रोणिबिम्बा नवप्रागसंसक्तहृत्
प्रथमविरहपीडिता सा मृता प्रेयसी गर्जितं वारिदानां निशम्य ध्रुवम् ।
नभसि कुटजपुष्पसंभारगंधासवोन्मत्तभृंगांगना गीयमानागमे
हत पथिक वृथा किमायास................................... ।
चण्डवृष्टिरित्येके ।११६

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशंखादयः । ११७

चरणं चरणं प्रति **प्रतिचरणं** रगणानां वृद्ध्या इहार्णादयो दण्डकास्स्युः ।

अष्टभी रगणैरर्णो यथा ।

श्रमसलिलमपकरोति द्रुतं कामिनीनां रसायासजं मरुच्चीकरामोदवान्
जनयति मधुपस्य तीरद्रुमाली लसत्पल्लवालंकृतां कामिनीविभ्रमादेशकम् ।
अयमिह दयितैः पुरोर्णानिधिं यस्य शक्यं समसायुवज्रप्रहारानभिज्ञभ्युसी (?)
भुजगपुरवधूलसल्लोचनानन्दकरो स्फुरन्ती न लीलां तनोति[207] राजात्मजः ॥

नवभी रगणैरर्णवो यथा ।

त्रिनयननगतुंगशृंगश्रियं बिभ्रदुद्दण्डडिंडीरपिण्डावदातैस्तरंगोत्तरैरुल्लसन्
मकरतिमितिमिंगिलो विस्तृताधिष्ठितक्रोडसंप्राप्तशोभैर्नभःप्रांगणज्ञापकैः ।
भुजगशयनशयितो देवदेवस्य यो वास वेश्मश्रियो जनेनार्णवसोऽयमग्रीः प्रिये
तव नयनपथं प्रयातस्तनोतुं प्रमोदं विनोदास्पदं तीरसंभूतपुन्नागपूगद्रुमैः ॥

दशभी रगणैः व्यालो[208] यथा ।

प्रसयति मलयानिले विप्रयुक्तांगनादीर्घनिःश्वाससंपर्कसंववर्धितप्रौहितावेमतोनन्दनि
स्फुडितबकुलकर्णिकाराम्रदुन्नागमाकंदकंकिल्लिसच्चम्पकामोदवाहिन्यमुष्मिन् वसंतागमे।
भज चरणयुगानतं[209] संनतांगिप्रियं प्रीतिसंदोहकामिनी नाम नगातुराणां मृगीचक्षुषाम्

---

[207] पाठे तनोद्रिराजात्मजः ।

[208] पाठे व्याले ।

तरुणीमनि (?) सखि स्फुरज्ज्वालजिह्वाग्रलोलेऽङ्गनानां सदा सौख्यं विध्वंसिनाऽनेन किं दग्धमानेन ते ॥

तैरेकादशभिर्जीमूतैर्यथा ।

प्रियविरहितकामिनी जीविता सा
विनाशैकदक्षानिलोद्धूतकादम्बपुष्पासवामूर्च्छिताशेषभृंगध्वजो ।
नभसि नभमिवांक्षसौदामिनीमालयालंकृतं नीलजीमूतपंक्तिं बलाकावलीसेवितां लोचनानन्ददाम् ।
विरचितमधुरस्वरं चातकानां[210] च रम्यं समूहं तु सास्कांतमप्युन्मदं(?) भाविनीं तृप्तिमाकांक्षमाणम् ।
मुहुकृतविततसुबर्हिभारः शिखीसंवन्मन्मथा प्रेयसी प्रीतिमुत्पादयन् नृत्यति स्वाङ्घ्रिविन्याससौंदर्यवत् ॥

द्वादशभिर्लीलाकरो यथा ।

अभिनवनवपल्लवास्वादसंशुद्धकण्ठान्यपुष्टांगनासुंदरारध्वगीतध्वनिप्राप्तबोधिर्यदि चक्रवाले वने ।
कुसुमितबहुपाटला कर्णिकाराम्रसत्सिंदुवारोत्तमाशोकसत्पुष्पभारा
वनश्रीकृताशेषशाखालसत्पल्लवे वने ।
विलपति वनिता घनस्याभिमानग्रहं लास्यलीलाकरो माधवी पल्लवानामयं
कामदेवैकबन्धवसन्तानिलो ।
जगति विजयिनीं स्मराज्ञामिवाविष्करोत्यंगनानां रतायासजस्वेदबिन्दुप्रसक्तालकप्रांतकंपं विधित्सुर्मुहुः ॥

त्रयोदशभी[211] रगणैरुद्दामो यथा ।

शशधरसदृशं मुखाम्भोरुहं[212] बिभ्रती पक्वबिम्बाधरोद्दामहारावलीशोभितोच्चस्तनी
सूक्ष्मरोमावलीप्राप्तनाभिह्रदा ।
श्रवणयुगनिवेशितस्वर्णताण्डंकसंलग्नरत्नप्रभासितापांगरंगांगणोत्संगसंनृत्यमानेक्षणक्षोभित क्ष्मातला[213] ।

---

[209] चरणयुगानतं / चरणयुगाततं वा ।

[210] पाठे चतकानां ।

[211] पाठे त्रयोदशभि ।

[212] पाठे मुखाम्भोरुहां ।

[213] पाठे श्रवणयुगनिवेशितस्वर्णताण्डंकसंलग्नरत्नप्रभासितापांगरंगांग**णे**त्संगसंनृत्यमानेक्षणक्षोभितक्ष्मातला ।

कलरववरकिंकिणीपक्वणन्मेखलालंकृतश्रोणिबिम्बानुवृत्तानुपूर्वोरुयुग्मा
सरोजारुणाङ्घ्रिद्वयन्यस्तसन्नूपुरा ।
हृदयमशरणं मुनीनामपीयं सलीलं व्रजंती करोति
स्फुरच्चीवरप्रांजलोद्बोधितानंगलक्ष्मीकृताशेषलोकं भृशाम् ॥

चतुर्दशभी रैः शंखो यथा ।

क्वचिदुपरि तरच्चंदवल्लीवितानैः क्वचिद्द्रुमाणां लतासंचयैः संचरन्नक्रचक्रैः
क्वचिन्नीरसंभूतपूगद्रुमैः शोभितम् ।
क्वचिदपि घनसांम्रहिंतालतालावलीचारुताम्बूलवल्लीसमूहैः (?)
क्वचिद्व्यालसल्लोलकोलाहलोत्पादितोर्वीप्रकंपम् ।
क्वचिदभिनवचम्पकोन्निद्रचंचत्प्रस्तनासवामोदसंपर्कैः
संप्राप्तसौरभ्यसंपत्समीरागमातीततोयकणैः सेकितं नीरहृतं विद्रुतम् ।
सलिलनिधिमनेकरत्नाकरप्रीतिसंदोहदं सेतुसीमंतमंतं विलोक्य द्रुतं विलोचनानां निपातं च
यस्याशु साफल्यमापादयः ॥

आदिशब्दात्पंचदशभिः रैः समुद्रः षोडशैर्भुजंग इत्येवमादयो यथेष्टकृतनामानो दण्डका भवन्ति । ११७

प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः । ११८

नगणद्वयानंतरं **सप्तभिर्यैः प्रचितको** नाम **दण्डकः स्मृतः** । पूर्ववदत्रापि
प्रतिचरणविवृद्धरेफक्रमेण यगणादिसमस्तगणवृद्ध्या दण्डका भवन्ति । यथा ।
पूर्वमेकैकाक्षरवृद्ध्या छंदसां वृद्धिरुक्तास्तथा रेफोपलक्षिता त्रयेण वृद्धिः सा
चाचार्यपारंपर्योपदेशात् तावद्ग्राह्या यावदेकोनमक्षरसाहस्रं भवन्ति । यद्यपि कैश्चिदुक्तं
सहस्राक्षरपर्यन्ता दण्डका इति तथापि तृकाणां वृद्ध्या एकोनमेव सहस्रं भवन्तीति ।११८

॥ इति दण्डकप्रकरणम् ॥

इति सुल्हणविरचितायां सुकविहृदयानंदिन्यभिधानायां[214] वृत्तरत्नाकरछन्दोवृत्तौ समवृत्ताध्यायस्तृतीयः ॥

---

[214] पाठे सुकविहृदयानंदन्यभिधानायां ।

चतुर्थोऽध्यायः
अर्धसमवृताध्यायः

अथार्धसमवृत्ताध्यायमाह ।

विषमे यदि सौ सलगा दले । भौ युजि भाद्गुरुकावुपचित्रम् । १

अत्र पादे इति वक्तव्ये अर्धसमवृत्ताध्याये त्वर्धापेक्षया अर्ध इत्युक्तं सूत्रकारेणेति न दोषः । **विषमे** प्रथमे तृतीये पादे त्रयः सगणा लघुर्गुरुर्यदि **युजि** समे द्वितीये चतुर्थे भगणत्रयं द्वौ गुरू तदा **उपचित्रा** नामार्धसमवृत्तं भवति । यथा ।
त्वदरातिपुरे क्षिति योद्धसे मुक्तमहोरगकंचुकेवंति (?) ।
उपचित्रमुदीक्ष्य दिवा भयान्नो विविशुर्भवनानि हरिण्यः ॥ १

भत्रयमोजगतं गुरुणी चेद्युजि च नजौ ज्ययुतौ द्रुतमध्या ॥ २

यस्यार्धसमवृत्तस्य **ओजे** विषमे प्रथमे तृतीये पादे **भगणत्रयं** द्वौ गुरू यदि **युजि** समे द्वितीये चतुर्थे नगणजगणौ जगणयगणौ च तद्वृत्तं **द्रुतमध्या** नाम । यथा ।
दृष्टिविलासविशेषमशेषं विविधगतीरवचोरचनां च ।
यौवनमेव वधू द्रुतमध्यापयति मनोभवदत्तविवेका ॥ २

सयुगात्सगुरू विषमे चेत् । भाविह वेगवती युजि भाद्गौ । ३

विषमे पादे त्रयः सगणा गुरुश्च **युजि** समे भवणत्रयं द्वौ गुरू च तदा **वेगवती** नाम । यथा ।
सुकृतैकनिधेः[215] स्मरबन्धोः कस्यचिदालयमालि सलीलम् ।
इयमुन्नतपीननितम्बा गच्छति वेगवती मदनार्ता ॥ ३

ओजे तपरौ जरौ गुरुश्चेत् । म्सौ ज्गौ भद्रविराड्भवेदनोजे । ४

ओजे विषमे पादे प्रथमे तृतीये तगणात्परौ जगणरगणौ **गुरुश्चे**द्यदि भवति **अनोजे** समे द्वितीये चतुर्थे पादे मगणसगणजगणा गुरू च भवन्ति तद्वृत्तं **भद्रविराट्** नाम । यथा।
कुन्देन्दुसमुज्ज्वलेन बद्धं ब्रह्माण्डोदरवर्तिनां नरेन्द्र ।

---

[215] पाठे सुकृतैकनिधैः ।

नीता हरशैलसंध्यमेते शुद्धभद्रविराड् पयसे यशस्ते ॥ ४

असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद्गः । ५

असमे विषमे पादे सगणजगणसगणा गुरुश्च **समे** द्वितीये चतुर्थे भगणरगणनगणा द्वौ गुरू च तद्वृत्तं **केतुमती** नाम । यथा ।
भवता रणांगणगतेन[216] प्रस्फुरितासिमात्रसचिवेन ।
विजितामराश्वगजयुक्ता केतुमती नरेन्द्र रिपुसेना ॥ ५

आख्यानिकी तौ जगुरू गमोजे जतावनोजे जगुरू गुरुश्चेत् । ६

ओजे प्रथमे तृतीये पादे तगणौ द्वौ जगणो गुरू च **अनोजे** द्वितीये चतुर्थे जगणतगणौ जगणो द्वौ **गुरू** च तद्वृत्तं **आख्यानिकी** नाम । यथा ।
ये ये त्वया संजति शत्रुभूपा हता हताशेषविपक्षवर्गं ।
आख्यानिकी कीर्तिरवन्तिनाथ बभूव ते संचरितांतरिक्षे ॥ ६

जतौ जगौ गो विषमे समे स्यात्तौ ज्गौ गमेषा विपरीतपूर्वा । ७

यस्य प्रथमे तृतीये पादे जगणतगणजगणा द्वौ गुरू च **समे** पादे द्वौ तगणौ जगणो द्वौ गुरू च तद्वृत्तं **विपरीताख्यानिकी**[217] नाम । यथा ।
ध्रुवं समागच्छति जीवितेश श्रुत्वादिकारुण्यपरं वचो मे ।
भवेन्न चेद्दैववशादिहान्या आख्यानिकी मे विपरीतपूर्वा ॥
आख्यानिकी वार्ताहारिकोच्यते[218] । एतयोश्च पूर्वोक्तोपजात्यंतर्गतत्वे विशेषसंज्ञार्धसमवृत्ताध्याये पाठः । ७

सयुगात्सलघू विषमे गुरुर्युजि नभौ च भरौ हरिणप्लुता । ८

यस्या **विषमे** पादे सगणत्रयं लघुगुरू च **समे** पादे नगणभगणौ भगणरगणौ च तद्वृत्तं **हरिणप्लुता** नाम । यथा ।
यदि शीघ्रगतिर्हरिणप्लुतान्सुविषमांस्तनुते पथिकः पथि ।
जलदागमने प्रियया तदा भवति संगतिरर्धशरीरया ॥ ८

---

[216] पाठे रणांगणेन गतेन ।

[217] पाठे विपरीताख्यानि ।

[218] पाठे आख्यानिमकीवार्ताहारिकोच्यते ।

अयुजि ननरला गुरुः समे न्जमपरवक्त्रमिदं ततो जरौ । ९

विषमे पादे नगणौ रगणो लघुश्च गुरुश्च भवन्ति **समे** पादे नगणजगणौ जगणरगणौ तद्वृत्तं **अपरवक्त्रं**[219] नाम । यथा ।
जलदगलपिशंगलोचनं मदनरिपोः शशिखण्डमण्डितम् ।
अपहरतु[220] भयानि दक्षिणं[221] तदपरवक्त्रभयंकरं सताम् ॥
अस्य वैतालीयान्तर्गतत्वेऽपि विशेषसंज्ञार्थं इहोपन्यासः ।९

अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा । १०

यस्य विषमे पादे नगणद्वयं रगणात्परो यगणः समे नगणजगणौ जगणरगणौ गुरुश्च तद्वृत्तं **पुष्पिताग्रा** नाम ।
चलकिशलयवत्यशोकशाखा तव चरणाहतिमात्रपुष्पिताग्रा [222]।
शशिमुखि सखि मुञ्च मानमस्या मदनमहोत्सव एष याति शून्या ॥
इयमप्यौपच्छन्दसिकं विशेषसंज्ञाज्ञापकार्थमत्रोच्यते । १०

वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितम् । पुष्पिताग्राभिधं केचिदौपच्छंदसिकं तथा ॥ ११[223]

स्यादयुग्मके रजौ रजौ समे तु जरौ जरौ गुरुर्यवात्परा मतीयम्[224] । १२

यस्य विषमे पादे रगणजगणौ रगणजगणौ समे जगणरगणौ जगणरगणौ गुरुश्च तद्वृत्तं **यवात्परामतीयं**[225] भवतीत्यर्थः[226] । यथा ।
मालवक्षितीश[227] मासमुद्रशालि यवानतारिभूयमेदिनी समग्रा ।

---

[219] पाठे अपरवक्त्र नाम ।
[220] पाठे अपरतु ।
[221] पाठे दक्षणं ।
[222] पाठे चरणावतिमात्रपुष्पिताग्रा ।
[223] टीकायां विवरणं नास्ति ।
[224] पाठे वतीयम् ।
[225] केषुचित्पुस्तकेषु वृत्तरत्नाकरे 'यवमती' इति नाम । अयमेवार्थ अत्र भवेत् ।
[226] पाठे भवन्तीत्यर्थः ।

आत्मसात्कृता[228] त्वया रिपून् विजित्य समग्रसैन्यसंयुतानपि प्रसह्य ॥ १२

इति सुल्हणविरचितायां सुकविहृदयानन्दिन्यभिधानायां वृत्तरत्नाकरच्छंदोवृत्तौ अर्धसमवृत्ताध्यायः चतुर्थः ।

---

[227] पाठे मालावक्षितीश ।

[228] पाठे आत्मा सात्कृता ।

पञ्चमोऽध्यायः

विषमवृत्ताध्यायः

विषमवृत्ताध्याय आरभ्यते ।

मुखपादोऽष्टभिर्वर्णैः ।
परेऽस्मात् मकरालयैः क्रमाद्वृद्धाः ।
सततं यस्य विचित्रैः पादैः संपन्नसौंदर्यम् ।
तदभिहितममलधीभिः पदचतुरूर्ध्वाभिधं वृत्तम् ॥ १

प्रथमपादोऽष्टाक्षरः । **परे** च द्वितीयतृतीयचतुर्थाः ।
अस्मात्प्रथमपादा**त्मकरालयै**श्चतुर्भिश्चतुर्भिरक्षरैः **क्रमाद्वृद्धा** वर्धिताः । क्रमादिति कोऽर्थः । द्वितीयो द्वादशाक्षरः । तृतीयो षोडशाक्षरः । चतुर्थो विंशत्यक्षर इति क्रमाद्वृद्धिं प्राप्ताः[229] ।
सततमनवरतं इति विविधैश्चतुर्विंशतिप्रकारप्रस्तारेण **विचित्रैः पादैः** प्राप्तसौंदर्यं त**द्वृत्तं** आचार्यैः **पदचतुरूर्ध्वं** नामोक्तम् । यथा ।
आक्रम्यमाकृष्य धनु-
र्ये त्वया निहिता रणांगणे शरैः ।
रिपवः सहसा गतासवः क्षितिपते श्रुतम् ।
पदचतुरूर्ध्वं न चलन्ति तत्रैव निपतन्ति सशल्याः ॥
अत्र गणपादाभावात् गुरुलघू नेष्यते । अत्र च प्रस्तार्यमाणं चतुर्विंशतिधा भवति ।
षोडशद्वादशअष्टौ षोडशविंशतिद्वादश अष्टौ इत्यादि ।१

प्रथममुदितवृत्ते ।
विरचितविषमचरणभाजि ।
गुरुकयुगलनिधन इह कलित आङ ।
विधृतरुचिरपदविततियतिरिह भवति पीडः ॥ २

प्रथममुदितवृत्ते पदचतुरूर्ध्वे विरचितान् विषमान् अष्टौद्वादशषोडशविंशत्यक्षरान् पदान् भजतीति तस्मिन् **विषमचरणभाजि इह** छंदसि **आङ कलितो** युक्तः **पीडो** भवति । **आपीड इत्यर्थः** । क्व सति इत्याह । **गुरुकयुगलनिधने** गुरुद्वयं निधनेऽवसाने यस्य तस्मिन्सति । कीदृशं इत्याह । **विधृतरुचिराणां पादानां वितत्या यति**र्विरामो यस्य स

229 पाठे नांता ।

तथोक्तः । अन्ते गुरुद्वयोपादनादत्र शेषाणां लघुत्वमस्यानुज्ञानं केदारेणेति मन्यामहे । यथा ।
ध्रुवमिह वनितानां
हृदि विनिहितदयितगुणानाम् ।
प्रसरति मलयमरुति विरहवतीनां
स्मरसुहृदि विजयिनि भवति नियतमसुविनाशः ॥
द्विगुरूणि छंदसि आपीडेति त्रयाणां गुरूणां अप्रवेशा**च्छर्गण्ड** इति नाम नोक्तम् ।
इदमपि पूर्ववच्चतुर्विंशतिप्रस्तारो भवति । तेभ्यश्चतुर्विंशतिभ्यस्त्रीनवकृष्य समान्यभिधातुमाह । २

प्रथममितरचरणसमुत्थं
श्रयति जगति लक्ष्म ।
इतरदितरचरणजनितमपि च तुर्यं [230]
चरणयुगकमविकृतमपरमिह कलिका सा ॥ ३

आपीडस्य **प्रथमं तुर्यं** चतुर्थं **इतरचरणसमुत्थं** द्वितीयपादं द्वादशाक्षरोपलक्षितं **लक्ष्म** श्रयति भजति । कोऽर्थः । प्रथमपदे द्वादशाक्षरः । द्वितीयोऽष्टाक्षरः । अपरमपि **चरणयुगलमविकृतम**प्रत्ययाभावमित्येवंलक्षणा **कलिका** नाम । **मञ्जरीति वक्तव्ये** छंदोभंगभयात् कलिकेत्युक्तमेकार्थत्वान्न दोषः । यथा ।
अधमजनसुहृदि कलिकाले
सुजनकृतविरोधे ।
सकलुषमुषि सपदि विधुवनायाः
तदनु विमनमनसि मुदमिह जनयति निवासा ॥ ३

द्विगुरुयुतसकलचरणांता
मुखचरणरचितमनुभवति तृतीयः ।
चरण इह हि लक्ष्म[231]
प्रकृतमपरमखिलमपि यदि भवति लवली सा । ४

---

[230] छंदोभङ्गः लक्ष्यते ।
[231] पाठे चरण इह लक्ष्म ।

यस्या**स्तृतीयः** पादः प्रथम**चरणरचितं** लक्षण**मनुभवति** द्वाभ्यां गुरुभ्यां युता सकलचरणानामन्तो यस्याः सा तथोक्ता **लवली** नाम । **अपरं** लवल्यां सर्वमपि प्राक्तनं प्रस्तुतं पूर्ववदिति भवति । यथा ।

गगनतलममलमलिमेतत्
सपदि शशभृदयं अनलवितिकरौघैः ।
जनयति च लवल्याः
चलमिति सरसं भुविद्धविपरिणति(?) परिपीडः ॥ ४

प्रथममधिवसति यदि तुर्यं
चरमचरणपदमवसितिगुरुयुग्मा ।
निखिलपरमुपरितनसममिह ललितपादा
तदियममृतधारा ॥ ५

प्रथमं पादमष्टाक्षरं **चरमचरणपदं** पश्चिमपादस्थानं य**द्यधिवसति** । **अपर**मप्यन्यत्सर्वं **उपरितनं** पूर्ववत् । अन्ते गुरुद्वययुक्ता सुललितपदपंक्ति**रमृतधारा** नाम । यथा ।

शशधरमुखि सखि परिरम्भं
तव मम वपुषि मलयजरसनिषेकः ।
श्रवणपुटयुगलसुखकृदतिचतुरमभिहृद्या
वचनममृतधारा ॥

पिंगलनागस्तु[232] पदचतुरूर्ध्वादिषु प्रथमपादविपर्यासे सति मंजर्यादि[233] नामानि वीक्ष्यति । ५

॥ पदचतुरूर्ध्वप्रकरणम् ॥

सजमादिमे सलघुकौ च नसजगुरुकेष्वथोद्गता ।
त्र्यङ्घ्रिगतभनजला गयुता सजसा जगौ चरणमेकत पठेत् ॥ ६

प्रथमपादे सगणजगणसगणा लघुश्च तथा द्वितीयपादे नगणसगणजगणगुरवो भवन्ति त्रिसंख्योपलक्षितोऽङ्घ्रि**स्त्र्यङ्घ्रि**स्तृतीयः पादस्तस्मिन् **गता**

[232] पाठे पिंगलनगणस्तु ।
[233] पाठे मंजरीयादि ।

भगणनगणजगणलघुगुरवस्तैर्युता । चतुर्थे चरणे सगणजगणसगणा जगणो गुरुश्च यत्र सा **उद्गता** नाम । **एकत** इति । प्रथमं द्वितीयेन सहाविलंबितं पठेदित्यर्थः । यथा ।
जितमत्सरा सुकृतिनोऽपि[234] परिहृतकलंकबांधवाः ।
वीक्ष्य सपदि युवतिं विकृतिं नियतं प्रयाति विपुलोद्गतास्तनुः ॥ ६

चरणत्रयं भजति लक्ष्म यदि सकलमुद्गतागतम् ।
नौं भगौ भवति सौरभकं चरणे यदीह भवतस्तृतीयके ॥ ७

यद्युद्गतायास्तृतीये पादे रगणनगणभगणगुरवो भवन्ति तदा **सौरभकं** नाम वृत्तं भवेत् । यथा ।
मलयानिलः प्रियवियुक्तयुवतिजनतावियत्यतः ।
मंदमंदमयमेतितरां घनसारसौरभकमुद्वमन्निव ॥ ७

नयुगं सकारयुगलं च भवति चरणे तृतीयके ।
तदुदितमुरुमतिभिर्ललितं[235] यदि शेषमस्य खलु पूर्वतुल्यकम् ॥ ८

यद्युद्गतायास्तृतीये चरणे द्वौ नगणौ द्वौ सगणौ च भवतः तदा **ललितं** नाम ।
शेषमुद्गतावत् । यथा ।
ललितांगहाररमणीयमभिनवललितं समांसलम् ।
इयमतिनयति मुदा प्रमत्ता[236] पुरतो वयस्य तव लास्यमुत्तमम् ॥ ८

॥ उद्गताप्रकरणम् ॥

म्सौ ज्भौ गौ प्रथमाङ्घ्रिरेकतः पृथगन्यत्
त्रितयं सनजरगास्तथा ननौ सः ।
त्रिनपरिकलितजयौ
प्रचुपितमितमुदितमुपस्थितपूर्वम् ॥ ९

यस्य प्रथमे पादे मगणसगणजगणभगणा द्वौ गुरू **एकतः** । **पृथक् अन्यत्त्रितयं** पादत्रितयं कथमित्यर्थः । द्वितीये पादे सगणनगणजगणरगणा गुरुश्च तथा तृतीये पादे

---

[234] पाठे सुकृतनोपि ।

[235] पाठे तदुदितमुरमुरमितिभिर्ललितं ।

[236] छंदोभङ्गः दृश्यते ।

द्वौ नगणौ सगणश्चतुर्थे नगणत्रयं जगणयगणौ च तद्वृत्तं **उपस्थितपूर्वं उपस्थितप्रचुपितमि**त्यर्थः । यथा ।
आरुह्यान्यभृतप्रिया लसत्सहकारं प्रकटीकृतनवमंजरिं सगर्वा[237] ।
निजकलरवनिनदैः[238] प्रकटयति रतिपतिमहोत्सवमालि[239] ॥ ९

नौ पादेऽथ तृतीयके सनौ नसयुक्तौ प्रथमाङ्घ्रिकृतयतिस्तु[240] वर्धमानम् ।
त्रितयमपरमपि पूर्वसदृशमिह भवति प्रततमतिभिरिति गदितं खलु वृत्तम् ॥ १०

तदेव पदचतुरूर्ध्वं **तृतीये** पादे नगणौ सगणनगणौ च भवतः प्रथमस्य चतुरूर्ध्वस्याङ्घ्रिः प्रथमाङ्घ्रिवत् कृता यतिर्यस्य क्रियाविशेषणस्य त**त्प्रथमाङ्घ्रिकृतयति**र्यथा भवति । एव**मपर**पादत्रयं **पूर्वसदृशमिह** तन्त्रे त**द्वृत्तं** आचार्यै**र्वर्धमानं** नामोक्तम् । यथा ।
पादेन स्वयमुन्नतस्तनीभिरशोकः प्रमदाभिरभिहतः प्रवर्धमानः ।
विकसितकुसुमसमृद्धिमनुभवति बकुलतरुरपि वरयुवतिमुखासवसिक्तः ॥ १०

अस्मिन्नेव तृतीयके पादे तजरा स्युः प्रथमे च विरतिरार्षभं ब्रुवन्ति ।
तच्छुद्धविराट्पुरः स्थितं त्रितयमपरमपि[241] यदि पूर्वसमं स्यात् ॥ ११

अस्मिन्नेव[242] पदचतुरूर्ध्ववृत्ते[243] तृतीये पादे तगणजगणरगणा भवेयुः, अपरं पादत्रयमपि पूर्वसमं भवति तदा **शुद्धविराट्पुरःस्थितं आर्षभं** वदन्ति **शुद्धविराडार्षभमित्यर्थः**। यथा।
बिभ्राणा[244] वदनं शशांकबिंबसमानं[245] कमलायतनयना[246] कृशांगशोभिता ।

---

[237] पाठे प्रकटीकृतनवमंजरिसगर्वा ।
[238] पाठे निजकालरनिनदैः ।
[239] पाठे रतिपतिमहोत्सवमालिः ।
[240] पाठे 'च प्रथमाङ्घ्रिकृतयतिस्तु' ।
[241] पाठे तृतयमपरमपि ।
[242] पाठे यस्मिन्नेव ।
[243] पाठे पदचतुरूर्ध्वं वृत्ते ।
[244] पाठे बिभ्राण ।
[245] पाठे शशांकबिंबं समानं ।
[246] पाठे कमलायतनयनाः ।

पीनोच्चपयोधरद्वया जनयति मुदमधिकतरां वनितेयम् ॥ ११

॥ उपस्थितप्रचुपितप्रकरणम् ॥

विषमाक्षरपादं वा पादैरसमं दशधर्मवत् ।
यच्छंदो नोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तम् ॥ १२

विषमाक्षराणि येषु ते पादा यस्मिन् **विषमाक्षरपादं** यदेवमेव अष्टौ दशसप्तनवाक्षरं वा सर्वपादैरसमं त्रिपादं षट्पादं वा **दशधर्मवत्** । यथा ।
दश धर्मं न जानन्ति धृतिराष्ट्र निबोध तान् ।
मत्तः प्रमत्त उन्मत्तश्श्रांतः क्रुद्धो बुभुक्षितः ।
त्वरमाणश भीरुश्च लुब्धः कामी च ते दशः ॥ [247] इति षट्पदी गाथा ।
इत्येवमादि अस्मिन्[248] च्छंदस्यर्थे नोक्तं प्रयोगेषु दृश्यते तद्गाथेति विद्वद्भिरुक्तम् ।
मंगलगीतिकावेष्टकविपद्विध्रुवकचच्चरीपाद्धतिकाद्विपथकप्रभृति तत्सर्वं गाथासंज्ञमवगन्तव्यम् । छंदसामानंत्यात्प्रतिपदमभिधातुमशक्यं तत्सर्वसंग्रहणीयं एका संज्ञा कृतेति । १२

इति सुल्हणविरचितायां सुकविहृदयानन्दिन्यभिधानायां वृत्तरत्नाकरच्छंदोवृत्तौ विषमवृत्ताध्यायः पंचमः ॥

---

[247] महाभारत ५.३३.८२-८३

[248] पाठे इत्येवमादि यस्मिन् ।

षष्ठोऽध्यायः

षट्प्रत्ययाध्यायः

प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगुक्रिया ।
संख्या चैवाध्वयोगश्च षडेते प्रत्ययाः स्मृताः ॥ १[249]

इदानीं उक्तानां वृत्तानां षट्प्रत्ययानाह ।

पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः ।
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥ २
ऊने दद्याद्गुरूण्येवं यावत्सर्वलघुर्भवेत् ।
प्रस्तारोऽयं समाख्यातः छंदोविचितिवेदिभिः ॥ ३

पादे सर्वगुरौ यावतां वर्णानां वृत्तस्य पादस्तावंत एव गुरवो विलिख्यन्ते । यथा । चतुरक्षरच्छंदसि आद्या**द्गुरोरधः** अधोविभागे लघुं वर्णं न्यस्य स्थापयित्वा तदनंतरं न्यस्तलघोः सकाशात् शेषेभ्यो वर्णेभ्यो अधः किं स्थाप्यत इत्याह । **यथोपरि तथा शेषं** । यद्युपरि गुरुस्तदा अधस्तादपि गुरुर्यद्युपरि लघुस्तदा अधस्तादपि लघुः शेषम् । उपरि तुल्यो दीयते इत्यर्थः । तेन लघोरनंतरं त्रीणि गुरूणी स्थाप्यन्ते । **भूयः** पुनरपि **कुर्यादमुं विधिमिति** । लघुं न्यस्य गुरोरधः यथोपरि तथा शेषमिति पुनरप्यमुं विधिं कुर्यात् । यदा उपरि गुरुर्भवति लघुं न्यस्य गुरोरध इति विधेरभावाद्यः पूर्वदेशा**दूने दद्याद्गुरूणि** इति ऊनप्रदेशो गुरुभिः पूर्यत इत्यर्थः । **एवम**नेन प्रकारेण तावन्न्यासः कर्तव्यो **यावत्सर्वलघुः** पदो भवति ।प्रस्तार्यते इति **प्रस्तारः** वर्णानां विन्यासविशेषः । एवं चतुरक्षरपादे षोडशवृत्तानि[250] भवन्ति । छंदांसि विलीयन्ते अस्यामिति **छंदोविचिति**श्छंदःशास्त्रम् । **प्रस्तारो** व्याख्यातः । २-३

इदानीं नष्टं व्याख्यातुमाह ।

नष्टस्य यो भवेदंकः तस्यार्धेऽर्धे समे च लः ।
विषमे चैकमाधाय तदर्धेऽर्धे गुरुर्भवेत् ॥ ४

---

[249] टीकायां विवरणं नास्ति ।

[250] पाठे षोडशवृत्यानि ।

प्रस्तारदर्शितानां वृत्तानां मध्ये यद्वृत्तं नष्टं लुप्तं भवति तस्य **नष्टस्य यो भवेदंक** एकादिसंख्या **तस्य अर्धेऽर्धे समे च** अंके सति **लो** लघुर्भवति । **विषमे एकं आधाय** प्रक्षिप्य **तस्यार्धेऽर्धे गुरुर्भवेत्** । यथैतस्मिंश्चतुरक्षरे[251] छंदसि पंचमं वृतं नष्टम् । तस्य अंकः पंच स च अर्धं न प्रयच्छति । सैकः क्रियते तदा षड्भवन्ति । ते अर्धं क्रियन्ते । अर्धितास्त्रयो भवन्ति । तदर्धे गुरुः प्राप्यते पुनस्त्रयोऽर्धं न प्रयच्छन्ति । सैकाश्चत्वारः । तेऽपि अर्धस्तदर्धे पुनर्लब्धो गुरुद्वयोः समत्वात् । तदर्धे लघुः प्राप्यते पुनरेकोऽर्धं न प्रयच्छति । सैकोर्द्व्यः तदर्धे पुनरपि गुरुरेव लभ्यते । इत्थं नष्टस्योदाहरणम् । तथा च । आद्यौ द्वौ गुरू ताभ्यां परको लघुस्ततो गुरुरिति । ऽऽ।ऽ एतच्चतुरक्षरे छंदसि पंचमं वृत्तं भवति । ४

उद्दिष्टं[252] व्याख्यातुमाह ।

उद्दिष्टं द्विगुणानाद्यादुपर्यंकान्समालिखेत् ।
लघुस्था ये तु तत्रांकास्तैः सैकैर्मिश्रितैर्भवेत् ॥ ५

केनचित्तद्वृत्तं प्रस्तार्यकतमत् इति संख्यापरिज्ञाना उक्तं तदुद्दिष्टमुच्यते । पूर्वत्र वृत्तं न ज्ञायते । अतः संख्यया नष्टमुद्ध्रियते । अत्र पुनर्वृत्तं ज्ञायते संख्या न ज्ञायते अतः संख्यापरिज्ञानार्थं उद्दिष्टमिदमुच्यते । तस्य उद्दिष्टवृत्तस्य प्रथमादक्षरादारभ्य उपरि **द्विगुणा**नंकान् समालिखेत् । यथा । अस्मिन्नेव चतुराक्षरे छंदसि एकं वृत्तं उद्दिष्टं तस्य द्वौ वर्णौ गुरू ततो लघुस्ततोऽपि गुरुः । तत्र उद्दिष्टे वृत्ते लघुनि तिष्ठन्तीति लघुस्था ये पुनरंकाश्चत्वारः[253] तैश्चतुर्भिः सैकैः एकेन सहितैः पंचभिरुद्दिष्टं भवेत् । उद्दिष्टसंख्या भवेत् । चतुरक्षरायां जातौ तत्पंचमं वृत्तं भवतीत्यर्थः ॥ ५

एकद्व्यादिलगुक्रियार्थमाह ।

वर्णान् वृत्तभवान् सैकान् औत्तराधर्यतः स्थितान् ।
एकादिक्रमशश्चैतानुपर्युपरि निक्षिपेत् ॥ ६
उपान्त्यतो निवर्तेत त्यजन्नैकैकमूर्ध्वतः ।
उपर्याद्याद्गुरोरेवमेकद्व्यादिलगुक्रिया ॥ ७

यावंत एव **वृत्तभवा वर्णा** तावत एव **सैकान्** एकसहितान् यथा । चतुरक्षरजातौ चत्वारो ये वर्णास्तान् सैकान् पंच । औत्तराधर्यतःस्थितान् उपर्युपरिभावेन स्थितान् **एकादिक्रमेणै**व

---

[251] पाठे चतुरक्षरै छंदसि(?)।

[252] पाठे उद्दिष्टे ।

[253] पाठे पुनरंकाश्चत्वार ।

एतानुपरि उपरि निक्षिपेत् निदध्यात् । **उपान्त्यतो** अन्त्यसमीपा**न्निवर्तेत** व्यायुद्येत । **त्यजन्** परिहरन् **एकैकं ऊर्ध्व**भागात् । **एवम**नेन प्रकारेण कस्मादियं एकद्व्यादिलगुक्रियां प्रवर्तत इत्याह । **उपर्याद्याद्गुरो**रिति उपरिस्थितान् आद्याद्गुरोः । कोऽर्थः । सर्वगुरुवर्णवृत्तसकाशात्[254] इत्यर्थः । आद्यं किल सर्वगुर्वक्षरमेकं वृत्तं परिकल्पते । एतच्च प्रस्तारे दर्शितं यथा ।

‘**पादे सर्वगुरावाद्याल्लघुं न्यस्ये**’ति तेन तस्मात् अध इयं **एकद्व्यादिलगुक्रिया** प्रवर्तते । तत्र पंचसु वर्णेषु उत्तराधरभावेन स्थापितेषु अधःस्थित एकस्तदुपरिस्थे निक्षिप्यते । स च तथैव तिष्ठति **त्यजन्नेकैकमूर्ध्वत** इति वीप्सवशादेकदैव स्थितिमंतरेण निक्षिप्तत्वात् पुनर्निक्षेपभावादेकैकत्यागश्च न संभवति तस्मात्स्वरूपेण स्थित एव उपरि क्षिप्यते । ततो द्वितीये स्थाने द्वौ वर्णौ भवतः तौ तृतीयेन क्षिप्येत तत्र त्रयो भवन्ति । तच्च चतुर्थे निक्षिप्यन्ते ते चत्वारो भवन्ति । ‘**उपान्त्यतो निवर्तते त्यजन्नेकैकमूर्ध्वतः**’ उपरितनमेकं[255] त्यज्यते तत्र न क्षिप्यते इत्यर्थः । वीप्सा त एव अधोभागात् पुनर्निक्षेपे क्रिया प्रवर्तते तेन अधःस्थित एव एको द्वितीये स्थाने निक्षिप्यते तत्र च त्रयो भवन्ति । तच्च तृतीये निक्षिप्यन्ते तत्र षट्भवन्ति उपरि एकं त्यजन्निवर्तेत । आद्यं एकं वृत्तं सर्वगुरुः तस्माद्देकद्व्यादिलगुक्रिया प्रवर्तेते । तत एकः सर्वगुरुः चत्वारि द्विलघूनि षट्त्रिलघूनि चत्वारि चतुर्लघूनि एकं सर्वलघुः[256] एषा लगुक्रिया सर्वलघुप्रस्तारेण प्रतीयते अस्यास्तु एष एव क्रमः पंचाक्षरादिवृत्तेष्वपि । ६-७

[उदाहरणम् -

][257]

संख्यार्थमाह ।

[लगुक्रियाङ्कसन्दोहः भवेत्संख्याविमिश्रिते ।
उद्दिष्टाङ्कसमाहारः सैको वा जनयेदिमाम् ॥ ८][258]

---

[254] पाठे सर्वगुरुवर्णवृत्तशकाशात् ।

[255] पाठे उपरितनमेकंस्था ।

[256] पाठे सर्वलघुसर्वलघु ।

[257] In mathematical parlance, they are the values of ${}_4C_0$, ${}_4C_1$, ${}_4C_2$, ${}_4C_3$ and ${}_4C_4$ respectively.

लगुक्रियायां ये **अंका**स्तेषां **सन्दोह**स्तस्मि**न्विमिश्रिते** पीडीकृते **संख्या** भवेत् । इयं तावद्धारणं[259] स्यात् । तथा एकश्चत्वारः षट्चत्वारः एकमेषामेकीकृता वै षोडश भवन्ति चतुरक्षरजातौ प्रस्तार्यमाणायां षोडश वृत्तानि भवन्तीत्यर्थः । स च प्रस्तारः[260] पूर्वमेव व्याख्यातः ।

पक्षान्तरमाह ।

उद्दिष्टस्य वृत्तस्य उपरि ये **अंका** द्विगुणास्तेषां **समाहारः** एकीभावः **सैको** वा अथवा **जनयेदु**त्पादये**दिमां** संख्याम् । यथा । चतुरक्षरजातौ द्विगुणा ये अंका उपर्यारोपितास्तेषां समाहारः पंचदश सैकः षोडशेति ।८

अध्वार्थमाह ।

संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः ।
वृत्तस्यांगुलिकीं[261] व्याप्तिमधः कुर्यात्तथांगुलम् ॥ ९

चतुरक्षरजातौ या षोडश**संख्या स्याद्द्विगुणा** द्वात्रिंशतिः **एकोना** एकरहिता एकत्रिंशतिः **सद्भिः** पण्डितै**रध्वा** मार्गः **प्रकीर्तितः** । कथम् । **वृत्तस्य आंगुलिकीं** अंगुलप्रमाणां **व्याप्तिं** कुर्यात् । ९

अधुना पुनरपि कविरन्वयपूर्वकं पित्रा सह सात्मानं निर्दिशति ।

वंशेऽभूत्कश्यपस्य प्रकटगुणगणः शैवसिद्धान्तवेत्ता ।
विप्रः पव्येकनामा विमलतरमतिः शैवतत्वावबोधे ॥ १०
केदारस्तस्य सूनः शिवचरणयुगाराधनैकाग्रचित्तः ।
छंदस्तेनाभिरामं प्रविरचितमिदं[262] वृत्तरत्नाकराख्याम् ॥ ११

वंशेऽन्वये**ऽभूज्जा**तः **कश्यपस्य** कश्यं सोमं पिबतीति कश्यपः कश्यपशब्देन यद्यपि सुरा एवाभिधीयते[263] कथ्यते । तथाप्यत्र सोममुच्यते सुरापानस्य[264] ब्राह्मणे दिजे निषिद्धत्वात्

---

[258] पाठे नास्ति । टीकैवास्ति ।

[259] पाठे तावद्धारेणं ।

[260] पाठे प्रस्तार ।

[261] पाठे प्रवृत्तस्यांगुलिकीं ।

[262] पाठे छंदस्तेनाभिरामप्रविरचतिमिदं ।

[263] पाठे देवाभिधीयते ।

[264] पाठे सुरपानस्य ।

अन्वयार्थेन वंशार्थेन क्रनुयायित्वमुक्तं स्यात्[265] (?) । शिवस्य एते **शैवा** ये **सिद्धान्ता**स्तेषां **वेत्ता** । 'विद-विचारणे' इत्येतस्य रूपं न पुनः[266] 'विद-ज्ञाने' । तस्याशक्यत्वात्[267] । यो हि विचारयति चिन्तयति सो अवश्यं वेत्ति नह्यविदितं विचारयितुं[268] शक्नोति विशेषेण प्रतिपूरयति स्वर्गापवर्गादिकानि स **विप्रः विमलतरमतिः** विमला विस्तीर्णा तरला मनोहरा मतिर्यस्य अतिशयेन विमलमतिः । क्व । **शैवशास्त्रावबोधे** । **केदार**नामा तस्य पुत्रः शिवः शान्तो देवताविशेषः[269] तस्याराधनं तत्र एकाग्रं तन्निष्ठं चित्तं यस्य सः । तथा **तेन** केदारेणा**भिरामं** रमणीयं मनोहरं **छंदः प्र**कर्षेण **विरचितं वृत्तरत्नाकराख्याम्** ॥ १०-११

इति पंडितश्रीसुल्हणविरचितायां सुकविहृदयानन्दिन्यभिधानायां छंदोवृत्तौ षट्प्रत्ययाध्यायः षष्ठः समाप्तः ॥

श्रीः ।
शुभं भूयाल्लेखकस्य[270] ।
वसुयुग्मे .... [271]शुक्लश्च पंचम्यां हंसराजेन मुनिनाऽलिखट्टीका मनोरमा ॥

---

[265] पाठे अन्वयार्थेनवंशार्थेनक्रनुयायित्वमुक्तं स्यात् ।
[266] पाठे पुन ।
[267] पाठे तस्यसेह्रत्वात् ।
[268] पाठे विचारययुं ।
[269] पाठे देवताविशेष ।
[270] पाठे शुभं भूयाल्लेषकस्ये ।
[271] striked off